# Kedar's SubhaShita Collection

# સુભાષિતાનિ સઙ્ગ્રહ

## Document Information

Text title : subhaashhita collection by Kedar Naphade

File name : subhaashhita-kedar-alpha.itx

Category : sangraha, subhAShita, subhaashita

Location : doc_z_misc_subhaashita

Author : Kedar Naphade

Transliterated by : Kedar Naphade

Proofread by : Kedar Naphade

Source : Pre 1997 postings by Kedar, sorted alphabetically

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 11, 2024

*sanskritdocuments.org*

# સુભાષિતાનિ સઙ્ગ્રહ

અધિગત્ય ગુરોર્જ્ઞાનં છાત્રેભ્યો વિતરન્તિ યે ।
વિદ્યાવાત્સલ્યનિધયઃ શિક્ષકા મમ દૈવતમ્ ॥ ૧॥

અશ્વસ્ય ભૂષણં વેગો મત્તં સ્યાદ્ ગજભૂષણમ્ ।
ચાતુર્યમ્ ભૂષણં નાર્યા ઉદ્યોગો નરભૂષણમ્ ॥ ૨॥

અલસસ્ય કુતો વિદ્યા અવિદ્યસ્ય કુતો ધનમ્ ।
અધનસ્ય કુતો મિત્રં અમિત્રસ્ય કુતઃ સુખમ્ ॥ ૩॥

અષ્ટાદશપુરાણેષુ વ્યાસસ્ય વચનદ્વયમ્ ।
પરોપકારઃ પુણ્યાય પાપાય પરપીડનમ્ ॥ ૪॥

અહં નમામિ વરદાં જ્ઞાનદાં ત્વાં સરસ્વતીમ્ ।
પ્રયચ્છ વિમલાં બુદ્ધિં પ્રસન્ના ભવ સર્વદા ॥ ૫॥

અબ્ધેઃ ક્ષારં જલં પીત્વા વર્ષન્તિ મધુરં ભુવિમ્ ।
પરોપકારે નિરતાઃ કથં મેઘા ન સજ્જનાઃ ॥ ૬॥

અપેક્ષન્તે ન ચ સ્નેહં ન પાત્રં ન દશાન્તરમ્ ।
સદા લોકહિતે યુક્તા રત્નદીપા ઇવોત્તમાઃ ॥ ૭॥

અષ્ટાદશપુરાણાનાં સારં વ્યાસેન કીર્તિતમ્ ।
પરોપકારઃ પુણ્યાય પાપાય પરપીડનમ્ ॥ ૮॥

અધમા ધનમિચ્છન્તિ ધનં માનં ચ મધ્યમાઃ ।
ઉત્તમા માનમિચ્છન્તિ માનો હિ મહતામ્ ધનમ્ ॥ ૯॥

અપિ સ્વર્ણમયી લઙ્કા ન મે લક્ષ્મણ રોચતે ।
જનની જન્મભૂમિશ્ચ સ્વર્ગાદપિ ગરીયસી ॥ ૧૦॥

અશ્વં નૈવ ગજં નૈવ વ્યાઘ્રં નૈવ ચ નૈવ ચ ।
અજાપુત્રં બલિં દદ્યાત્ દેવો દુર્બલઘાતકઃ ॥ ૧૧॥

અગાધજલસઞ્ચારી ગર્વમ્ નાયાતિ રોહિતઃ ।
અઙ્ગુષ્ટોદકમાત્રેણ શફરી ફર્ફરાયતે ॥ ૧૨॥

અન્નદાનં પરં દાનં વિદ્યાદાનમતઃ પરમ્ ।
અન્નેન ક્ષણિકા તૃપ્તિર્યાવજ્જીવં ચ વિદ્યયા ॥ ૧૩॥

અલ્પકાર્યકરાઃ સન્તિ યે નરા બહુભાષિણઃ ।
શરત્કાલિનમેઘાસ્તે નૂનં ગર્જન્તિ કેવલમ્ ॥ ૧૪॥

અન્નં વસ્ત્રં નિવાસશ્ચ જ્ઞાનમારોગ્યમેવ ચ ।
વિજ્ઞાનં રાષ્ટ્રનિષ્ઠા ચ સન્માર્ગશ્ચાષ્ટમો મતઃ ॥ ૧૫॥

અતિલોભાત્કુબેરોઽપિ દરિદ્રો નિશ્ચિતં ભવેત્ ।
મિતવ્યયાત્ દરિદ્રોઽપિ નિશ્ચિતં ધનવાન્ ભવેત્ ॥ ૧૬॥

અર્થાગમો નિત્યમરોગિતા ચ પ્રિયા ચ ભાર્યા પ્રિયવાદિની ચ ।
વશ્યશ્ચ પુત્રોઽર્થકારી ચ વિદ્યા ષડ્ જીવલોકસ્ય સુખાનિ રાજન્ ॥ ૧૭॥

અતિતૃષ્ણા ન કર્તવ્યા તૃષ્ણાં નૈવ પરિત્યજેત્ ।
શનૈઃ શનૈશ્ચ ભોક્તવ્યં સ્વયં વિત્તમુપાર્જિતમ્ ॥ ૧૮॥

અકૃત્યં મન્યતે કૃત્યમગમ્યં મન્યતે સુગમ્ ।
અભક્ષ્યમ્ મન્યતે ભક્ષ્યમ્ સ્ત્રીવાક્યપ્રેરિતો નરઃ ॥ ૧૯॥

અવિશ્રામં વહેદ્ભારં શીતોષ્ણં ન ચ વિન્દતિ ।
સસન્તોષસ્તથા નિત્યં ત્રીણિ શિક્ષેત ગર્દભાત્ ॥ ૨૦॥

અતિપરિચયાદવજ્ઞા સન્તતગમનાદનાદરો ભવતિ ।
મલયે ભિલ્લપુરન્ધ્રી ચન્દનતરુકાષ્ઠમિન્ધનં કુરુતે ॥ ૨૧॥

અજરામરવત્ પ્રાજ્ઞો વિદ્યામર્થઞ્ચ સાધયેત્ ।
ગૃહીત ઇવ કેશેષુ મૃત્યુના ધર્મમાચરેત્ ॥ ૨૨॥

અયં નિજઃ પરો વેઽતિ ગણના લઘુચેતસામ્ ।
ઉદારચરિતાનાં તુ વસુધૈવ કુટુમ્બકમ્ ॥ ૨૩॥

અતિતીક્ષ્ણેન ખડ્ગેન વરં જિંવ્હા દ્વિધા કૃતા ।
ન તુ માનં પરિત્યજ્ય યચ્છ યચ્છેતિ ભાષિતમ્ ॥ ૨૪॥

અહો દુર્જનસંસર્ગાત્ માનહાનિઃ પદે પદે ।
પાવકો લોહસઙ્ગેન મુદ્ગરૈરભિતાડ્યતે ॥ ૨૫॥

અહો કિમપિ ચિત્રાણિ ચરિત્રાણિ મહાત્મનામ્ ।
લક્ષ્મીસ્તૃણાય મન્યન્તે તદ્ભરેણ નમન્ત્યપિ ॥ ૨૬॥

અકૃત્વા પરસન્તાપં અગત્વા ખલમન્દિરમ્ ।
સાધોર્માર્ગમનુત્સૃજ્ય યત્સ્વલ્પમપિ તદ્ બહુ ॥ ૨૭॥

અશનં મે વસનં મે જાયા મે બન્ધુવર્ગો મે ।
ઇતિ મે મે કુર્વાણં કાલવૃકો હન્તિ પુરુષાજમ્ ॥ ૨૮॥

અહઞ્ચ ત્વઞ્ચ રાજેન્દ્ર લોકનાથાવુભાવપિ ।
બહુવ્રીહિરહં રાજન્ ષષ્ઠી તત્પુરુષો ભવાન્ ॥ ૨૯॥

અવ્યાકરણમધીતં ભિન્નદ્રોણ્યતરઙ્ગિણીતરણમ્ ।
ભેશજમપથ્યસહિતં ત્રયમિદં કૃતં ન કૃતમ્ ॥ ૩૦॥

અહં સ્વર્ણં ન મે દુઃખમગ્નિદાહે ન તાડને ।
એતત્તુ મે મહાદુઃખં ગુઞ્જયા તોલયન્તિ મામ્ ॥ ૩૧॥

અજ્ઞાનતિમિરાન્ધસ્ય જ્ઞાનાઞ્જનશલાકયા ।
ચક્ષુરુન્મીલિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૩૨॥

અભીપ્સિતાર્થસિધ્યર્થં પૂજિતો યઃ સુરાસુરૈઃ ।
સર્વવિઘ્નહરસ્તસ્મૈ શ્રીગણાધિપતયે નમઃ ॥ ૩૩॥

અનાચારેણ માલિન્યમ્ અત્યાચારેણ મૂર્ખતા ।
વિચારાચારયોર્યોગઃ સ સદાચાર ઉચ્યતે ॥ ૩૪॥

અર્થનાશં મનસ્તાપં ગૃહે દુશ્ચરિતાનિ ચ ।
વઞ્ચનં ચાપમાનં ચ મતિમાન્ન પ્રકાશયેત્ ॥ ૩૫॥

અર્થેન તુ વિહીનસ્ય પુરુષસ્યાલ્પમેધસઃ ।
ક્રિયાઃ સર્વા વિનશ્યન્તિ ગ્રીષ્મે કુસરિતો યથા ॥ ૩૬॥

અગ્રતઃ સંસ્કૃતં મેઽસ્તુ પુરતો મેઽસ્તુ સંસ્કૃતમ્ ।
સંસ્કૃતં હૃદયે મેઽસ્તુ વિશ્વમધ્યેઽસ્તુ સંસ્કૃતમ્ ॥ ૩૭॥

અસિતગિરિસમં સ્યાત્ કજ્જલં સિન્ધુ પાત્રં
સુરતરુવરશાખા લેખની પત્રમુર્વી ।
લિખતિ યદિ ગૃહીત્વા શારદા સર્વકાલં

તદપિ તવ ગુણાનામીશ પારં ન યાતિ ॥ ૩૮॥

અપારે કાવ્યસંસારે કવિરેકઃ પ્રજાપતિઃ ।
યથાસ્મૈ રોચતે વિશ્વં તથા વૈ પરિવર્તતે ॥ ૩૯॥

અધનાધિ નિવર્તન્તે જ્ઞાતયઃ સુહૃદો જનાઃ ।
અપુષ્પાદફલાદ્વૃક્ષાત્ યથા સર્વે પતત્રિણઃ ॥ ૪૦॥

અસ્માકં બદરીચક્રં યુષ્માકં બદરીતરુઃ ।
બાદરાયણસમ્બન્ધાત્ યૂયં યૂયં વયં વયમ્ ॥ ૪૧॥

અહમ્પૂરુષો ભારતીયોઽસ્મિ નૂનં
ન ધૈર્યઙ્કુદાચિત્ત્યજેયં વિપત્સુ ।
સ્વકર્તવ્યનિષ્ઠાં ન વા વિસ્મરેયં
યતિષ્યે સ્વરાષ્ટ્રસ્ય કલ્યાણહેતોઃ ॥ ૪૨॥

અહમ્ભારતી સ્ત્રી સ્વયં શક્તિરૂપા
મયિ શ્રીશ્ચ દુર્ગા તથા શારદા ચ ।
ત્યજેયં કદાચિન્ન શીલાભિમાનં
વિરોદ્ધું તુ સિદ્ધાહમન્યાય્યરૂઢીઃ ॥ ૪૩॥

અઞ્જલિસ્થાનિ પુષ્પાણિ વાસયન્તિ કરદ્વયમ્ ।
અહો સુમનસાં પ્રીતિર્વામદક્ષિણયોઃ સમા ॥ ૪૪॥

અઙ્ગારા અઞ્જલિસ્થા હિ દાહયન્તિ કરદ્વયમ્ ।
અહો દુર્મનસાં વૈરં વામદક્ષિણયોઃ સમમ્ ॥ ૪૫॥

અનુદિનમનુતાપેનાસ્મ્યહં રામ તપ્તઃ
પરમકરુણમોહં છિન્ધિ માયાસમેતમ્ ।
ઇદમતિચપલં મે માનસં દુર્નિવારં
ભવતિ ચ બહુખેદસ્ત્વાં વિના ધાવ શીઘ્રમ્ ॥ ૪૬॥

અતિકુપિતાઽપિ સુજના યોગેન મૃદૂભવન્તિ ન તુ નીચાઃ ।
હેમ્નઃ કઠિનસ્યાપિ દ્રવણોપાયોઽસ્તિ ન તૃણાનામ્ ॥ ૪૭॥

અસ્યાં સખે બધિરલોકનિવાસભૂમૌ
કિં કૂજિતેન કિલ કોકિલ કોમલેન ।
એતે હિ દૈવહતકાસ્તદભિન્નવર્ણં
ત્વાં કાકમેવ કલયન્તિ કલાનભિજ્ઞાઃ ॥ ૪૮॥

અત્તું વાઞ્ચતિ વાહનં ગણપતેરાખું ક્ષુધાર્તઃ ફણી
તં ચ ક્રૌંચપતેઃ શિખી ચ ગિરિજાસિંહોઽપિ નાગાનનમ્ ।
ગૌરી જહ્નુસુતામસૂયતિ કલાનાથં કપાલાનલઃ
નિર્વિણ્ણઃ સ પપૌ કુટુમ્બકલહાદીશોઽપિ હાલાહલમ્ ॥ ૪૯॥

અભિવાદનશીલસ્ય નિત્યં વૃદ્ધોપસેવિનઃ ।
ચત્વારિ તસ્ય વર્ધન્તે આયુર્વિદ્યા યશો બલમ્ ॥ ૫૦॥

અમ્બા યસ્ય ઉમાદેવી જનકો યસ્ય શઙ્કરઃ ।
વિદ્યા દદાતિ સર્વેભ્યઃ સ નઃ પાતુ ગજાનનઃ ॥ ૫૧॥

અસ્થિરં જીવિતં લોકે અસ્થિરે ધનયૌવને ।
અસ્થિરાઃ પુત્રદારાશ્ચ ધર્મઃ કીર્તિદ્વયં સ્થિરં ॥ ૫૨॥

આકાશાત્ પતિતં તોયં યથા ગચ્છતિ સાગરમ્ ।
સર્વદેવનમસ્કારઃ કેશવં પ્રતિગચ્છતિ ॥ ૧॥

આત્માર્થમ્ જીવલોકે ચ કો ન જીવતિ માનવઃ ।
પરં પરોપકારાય યો જીવતિ સ જીવતિ ॥ ૨॥

આચારઃ પરમો ધર્મઃ આચારઃ પરમં તપઃ ।
આચારઃ પરમં જ્ઞાનમાચારાત્ કિં ન સાધ્યતે ॥ ૩॥

આયુષઃ ક્ષણ એકોઽપિ સર્વરત્નૈર્ન લભ્યતે ।
નીયતે સ વૃથા યેન પ્રમાદઃ સુમહાનહો ॥ ૪॥

આસ્તે ભગ આસીનસ્ય ઊર્ધ્વસ્તિષ્ઠતિ તિષ્ઠતઃ ।
શેતે નિપદ્યમાનસ્ય ચરાતિ ચરતો ભગઃ ॥ ૫॥

આપદ્ગતં હસસિ કિં દ્રવિણાન્ધ મૂઢ
લક્ષ્મીસ્થિરા ન ભવતીતિ કિમત્ર ચિત્રમ્ ।
એતાન્ પ્રપશ્યસિ ઘટાં જલયન્ત્રચક્રે
રિક્તા ભવન્તિ ભરિતા ભરિતાશ્ચ રિક્તાઃ ॥ ૬॥

આશા નામ મહુષ્યાણાં કાચિદાશ્ચર્યશૃઙ્ખલા ।
યયા બદ્ધા પ્રધાવન્તિ મુક્તાસ્તિષ્ઠન્તિ પઙ્ગુવત્ ॥ ૭॥

આત્મનઃ પરિતોષાય કવેઃ કાવ્યં તથાપિ તત્ ।

સ્વામિનો દેહલીદીપસમમન્યોપકારકમ્ ॥ ૮॥

આત્મનઃ મુખદોષેણ બધ્યન્તે શુકસારિકાઃ ।
બકાસ્તત્ર ન બધ્યન્તે મૌનં સર્વાર્થસાધનમ્ ॥ ૯॥

આદાનસ્ય પ્રદાનસ્ય કર્તવ્યસ્ય ચ કર્મણઃ ।
ક્ષિપ્રમક્રિયમાણસ્ય કાલઃ પિબતિ તદ્રસમ્ ॥ ૧૦॥

આપદિ મિત્રપરીક્ષા શૂરપરીક્ષા રણાઙ્ગણે ભવતિ ।
વિનયે વંશપરીક્ષા શીલપરીક્ષા ધનક્ષયે ભવતિ ॥ ૧૧॥

આત્મપક્ષં પરિત્યજ્ય પરપક્ષેષુ યો રતઃ ।
સ પરૈર્હન્યતે મૂઢઃ નીલવર્ણશ‍ૃગાલવત્ ॥ ૧૨॥

આશુશબ્દસ્ય અન્તેન કલાયાઃ પ્રથમેન ચ ।
વિહગો યો ભવેત્તસ્ય વર્ણમ્ શીઘ્રં નિવેદય ॥ ૧૩॥

આતતાયિનમાયાન્તમપિ વેદાન્તપારગમ્ ।
જિઘાંસન્તં જિઘાંસીયાત્ ન તેન બ્રહ્મહા ભવેત્ ॥ ૧૪॥

આદૌ રામતપોવનાભિગમનં હત્વા મૃગં કાઞ્ચનં
વૈદેહીહરણં જટાયુમરણં સુગ્રીવસમ્ભાષણમ્ ।
વાલીનિર્દલનં સમુદ્રતરણં લઙ્કાપુરીદાહનં
પશ્ચાદ્રાવણ કુમ્ભકર્ણહનનં એતધિ રામાયણમ્ ॥ ૧૫॥

આદૌ દેવકિદેવગર્ભજનનં ગોપીગૃહે વર્ધનં
માયાપુતનજીવિતાપહરણં ગોવર્ધનોદ્ધારણમ્ ।
કંસચ્છેદનકૌરવાદિહનનં કુન્તીતનૂજાવનં
એતદ્ભાગવતં પુરાણકથિતં શ્રીકૃષ્ણલીલામૃતમ્ ॥ ૧૬॥

આદૌ શ્રીભરતાખ્યભૂપતિકુલે ભક્તોત્તમાઃ પાણ્ડવાઃ
તેષામન્ધસુતાઃ શતઃ કપટિકા દુર્ભ્રાતરઃ કૌરવાઃ ।
બન્ધુદ્વેશકરં હિ કૌરવકુલં ભેજે રણે દુર્ગતિમ્ ।
ગીતા તારયતિ સ્મ કૃષ્ણભજકાન્નેતન્મહાભારતમ્ ॥ ૧૭॥

ઇચ્છેયેત્ વિપુલાં મૈત્રીં ત્રીણિ તત્ર ન કારયેત્ ।
વાગ્વાદમર્થસમ્બન્ધં તસ્યાઃ સ્ત્રીપરિભાષણમ્ ॥ ૧॥

ઈક્ષણં દ્વિગુણં પ્રોક્તં ભાષણસ્યેતિ વેધસા ।

અક્ષિણિ દ્વે મનુષ્યાણાં જિંવ્હા ત્વેકૈવ નિર્મિતા ॥ ૨॥

ઉદ્યમેન હિ સિદ્ધ્યન્તિ કાર્યાણિ ન મનોરથૈઃ ।
ન હિ સુપ્તસ્ય સિંહસ્ય પ્રવિશન્તિ મુખે મૃગાઃ ॥ ૩॥

ઉત્તમો નાતિવક્તા સ્યાત્ અધમો બહુ ભાષતે ।
ન કાઞ્ચને ધ્વનિસ્તાદૃક્ યાદૃક્ કાંસ્યે પ્રજાયતે ॥ ૪॥

ઉપકારોઽપિ નીચાનાં અપકારો હિ જાયતે ।
પયઃપાનં ભુજઙ્ગાનાં કેવલં વિષવર્ધનમ્ ॥ ૫॥

ઉત્સાહો બલવાનાર્ય નાસ્ત્યુત્સાહાત્ પરં બલમ્ ।
સોત્સાહસ્ય ચ લોકેષુ ન કિઞ્ચિદપિ દુર્લભમ્ ॥ ૬॥

ઉપદેશો હિ મૂર્ખાણાં પ્રકોપાય ન શાન્તયે ।
પયઃપાનં ભુજઙ્ગાનાં કેવલં વિષવર્ધનમ્ ॥ ૭॥

ઉત્તમા આત્મનઃ ખ્યાતાઃ પિતુઃ ખ્યાતાશ્ચ મધ્યમાઃ ।
અધમા માતુલાત્ ખ્યાતાઃ શ્વશુરાચ્ચાધમાધમાઃ ॥ ૮॥

ઉદારસ્ય તૃણં વિત્તં શૂરસ્ય મરણં તૃણમ્ ।
વિરક્તસ્ય તૃણં ભાર્યા નિઃસ્પૃહસ્ય તૃણં જગત્ ॥ ૯॥

એક એવ તપઃ કુર્યાત્ દ્વૌ સ્વાધ્યાયપરૌ હિતૌ ।
ત્રયોઽધિકા વા ક્રીડાયાં પ્રવાસેઽપિ ચ તે મતાઃ ॥ ૧૦॥

એકઃ સ્વાદુ ન ભુઞ્જીત નૈકઃ સપ્તેષુ જાગૃયાત્ ।
એકો ન ગચ્છેદધ્વાનં નૈકશ્ચાર્થાન્ વિચિન્તયેત્ ॥ ૧૧॥

એકચક્રો રથો યન્તા વિકલો વિષમા હયાઃ ।
આક્રામત્યેવ તેજસ્વી તથાપ્યર્કો નભસ્તલમ્ ॥ ૧૨॥

એકેનાપિ સુવૃક્ષેણ પુષ્પિતેન સુગન્ધિના ।
વાસિતં તદ્વનં સર્વમ્ સુપુત્રેણ કુલં યથા ॥ ૧૩॥

એકો હિ દોશો ગુણસન્નિપાતે નિમજ્જતીન્દોરિતિ યો બભાષે ।
નૂનં ન દૃષ્ટં કવિનાપિ તેન દારિદ્ર્યદોશો ગુણરાશિનાશી ॥ ૧૪॥

એતે સત્પુરુષા પરાર્થઘટકાઃ સ્વાર્થાન્ પરિત્યજ્ય યે
સામાન્યાસ્તુ પરાર્થમુદ્યમભૃતઃ સ્વાર્થાવિરોધેન યે ।
તેઽમી માનવરાક્ષસાઃ પરહિતં સ્વાર્થાય નિઘ્નન્તિ યે

યે તુ ઘ્નન્તિ નિરર્થકં પરહિતં તે કે ન જાનીમહે ॥ ૧૫॥

એકો ના વિંશતિઃ સ્ત્રીણાં સ્નાનાર્થમ્ શરયૂં ગતાઃ ।
વિંશતિઃ પુનરાયાતા એકો વ્યાઘ્રેણ ભક્ષિતઃ ॥ ૧૬॥

ઐક્યં બલં સમાજસ્ય તદભાવે સ દુર્બલઃ ।
તસ્માદૈક્યં પ્રશંસન્તિ દૃઢં રાષ્ટ્રહિતૈષિણઃ ॥ ૧૭॥

ૐકારશ્ચાથશબ્દશ્ચ દ્વાવેતૌ બ્રહ્મણઃ પુરા ।
કણ્ઠં ભિત્ત્વા વિનિર્યાતૌ તસ્માન્માઙ્ગલિકાવુભૌ ॥ ૧૮॥

ઋગ્વેદોઽથ યજુર્વેદો સામવેદો હ્યથર્વણઃ ।
ચત્વારઃ સન્તિ તે વેદાઃ માન્યાઃ સર્વત્ર પૂજિતાઃ ॥ ૧૯॥

ઋણશેષોઽગ્નિશેષશ્ચ શત્રુશેષસ્તથૈવ ચ ।
પુનઃ પુનઃ પ્રવર્ધન્તે તસ્માચ્છેષં ન રક્ષયેત્ ॥ ૨૦॥

ક્ષમા બલમશક્તાનાં શાક્તાનાં ભૂષણં ક્ષમા ।
ક્ષમા વશીકૃતે લોકે ક્ષમયા કિં ન સિધ્યતિ ॥ ૧॥

કાર્યાર્થી ભજતે લોકઃ યાવત્કાર્યમ્ ન સિધ્યતિ ।
ઉત્તીર્ણે ચ પરે પારે નૌકાયા કિં પ્રયોજનમ્ ॥ ૨॥

કાકઃ કૃષ્ણઃ પિકઃ કૃષ્ણઃ કો ભેદઃ પિકકાકયોઃ ।
વસન્તસમયે પ્રાપ્તે કાકઃ કાકઃ પિકઃ પિકઃ ॥ ૩॥

ક્ષુદ્રો હિ સમયે પ્રાપ્તે બલિષ્ઠમપિ રક્ષતિ ।
પ્રાજ્ઞા યૂયં વિજાનીત મા મા નિન્દત કઞ્ચન ॥ ૪॥

કશ્યપોઽત્રિર્ભરદ્વાજો વિશ્વામિત્રોઽથ ગૌતમઃ ।
વામદેવો વસિષ્ઠશ્ચ મુનયઃ સપ્ત વિશ્રુતાઃ ॥ ૫॥

કો ન યાતિ વશં લોકે મુખે પિણ્ડેન પૂરિતઃ ।
મૃદઙ્ગો મુખલેપેન કરોતિ મધુરધ્વનિમ્ ॥ ૬॥

કાકઃ પદ્મવને રતિં ન કુરુતે હંસો ન કૂપોદકે
મૂર્ખઃ પણ્ડિતસઙ્ગમે ન રમતે દાસો ન સિંહાસને ।
દુષ્ટઃ સજ્જનસઙ્ગમં ન સહતે નીચં જનં સેવતે
યા યસ્ય પ્રકૃતિઃ સ્વભાવનિયતા કેનાપિ ન ત્યજ્યતે ॥ ૭॥

ક્ષમા શસ્ત્રં કરે યસ્ય દુર્જનઃ કિં કરિષ્યતિ ।

અતૃણે પતિતો વહ્નિઃ સ્વયમેવોપશામ્યતિ ॥ ૮॥

કમલે કમલા શેતે હરઃ શેતે હિમાલયે ।
ક્ષીરાબ્ધૌ ચ હરિઃ શેતે મન્યે મત્કુણશઙ્કયા ॥ ૯॥

કુલીનતા સદારાધ્યા સુપ્રતિષ્ઠાં યદીચ્છસિ ।
આત્મવૈભવલાભાર્થમ્ ગુણવાન્ શીલવાન્ ભવ ॥ ૧૦॥

કવિઃ કરોતિ કાવ્યાનિ રસં જાનાતિ પણ્ડિતઃ ।
તરુઃ સૃજતિ પુષ્પાણિ મરુદ્વહતિ સૌરભમ્ ॥ ૧૧॥

કાર્યા ચ મહદાકાઙ્ક્ષા ક્ષુદ્રાકાઙ્ક્ષા કદાપિ ન ।
યથાકાઙ્ક્ષા તથા સિદ્ધિર્નિરીહો નાશ્નુતે મહત્ ॥ ૧૨॥

કા પાણ્ડુપત્ની ગૃહભૂષણં કિં
કો રામશત્રુઃ કિમગસ્તિજન્મ ।
કો સૂર્યપુત્રો વિપરીતપૃચ્છા
કુન્તી સુતો રાવણકુમ્ભકર્ણઃ ॥ ૧૩॥

કસ્તૂરી જાયતે કસ્માત્ કો હન્તિ કરિણાં શતમ્ ।
કિં કુર્યાત્ કાતરો યુદ્ધે મૃગાત્ સિંહઃ પલાયતે ॥ ૧૪॥

કન્યા વરયતે રૂપં માતા વિત્તં પિતા શ્રુતં ।
બાન્ધવાઃ કુલમિચ્છન્તિ મિષ્ટાન્નમિતરે જનાઃ ॥ ૧૫॥

કરારવિન્દેન પદારવિન્દં મુખારવિન્દે વિનિવેશયન્તમ્ ।
વટસ્ય પત્રસ્ય પુટે શયાનં બાલં મુકુન્દં મનસા સ્મરામિ ॥ ૧૬॥

કે શવં પતિતં દૃષ્ટ્વા પાણ્ડવા હર્ષનિર્ભરાઃ ।
રુદન્તિ કૌરવાઃ સર્વે ભો ભો કે શવ કે શવ ॥ ૧૭॥

ક્વચિત્ દુષ્ટઃ ક્વચિત્ તુષ્ટઃ
દુષ્ટસ્તુષ્ટઃ ક્વચિત્ ક્વચિત્ ।
અવ્યવસ્થિતચિત્તાનાં
પ્રસાદોઽપિ ભયઙ્કરઃ ॥ ૧૮॥

કં સઞ્જઘાન કૃષ્ણઃ કા શીતલવાહિની ગઙ્ગા ।
કે દારપોષણરતાઃ કં બલવન્તં ન બાધતે શીતમ્ ॥ ૧૯॥

ક્વચિત્ કાણો ભવેત્સાધુઃ ક્વચિત્ ગાની પતિવ્રતા ।

વિરલદન્તો ક્વચિન્મૂર્ખો ખલ્વાટો નિર્ધનઃ ક્વચિત્ ॥ ૨૦॥

કાવ્યેષુ નાટકં રમ્યં તત્ર રમ્યં શકુન્તલા ।
તત્રાપિ ચ ચતૂર્થોઽઙ્કો તત્ર શ્લોકચતુષ્ટયમ્ ॥ ૨૧॥

કિમપ્યસ્તુ સ્વભાવેન સુન્દરં વાપ્યસુન્દરમ્ ।
યદેવ રોચતે યસ્મૈ ભવેત્તત્તસ્ય સુન્દરમ્ ॥ ૨૨॥

કસ્યચિત્ કિમપિ નો હરણીયં
મર્મવાક્યમપિ નોચ્ચરણીયમ્ ।
શ્રીપતેઃ પદયુગં સ્મરણીયં
લીલયા ભવજલં તરણીયમ્ ॥ ૨૩॥

કોઽતિભારઃ સમર્થાનાં કિં દૂરં વ્યવસાયિનામ્ ।
કો વિદેશઃ સુવિદ્યાનાં કઃ પરઃ પ્રિયવાદિનમ્ ॥ ૨૪॥

કેચિદજ્ઞાનતો નષ્ટાઃ કેચિન્નષ્ટાઃ પ્રમાદતઃ ।
કેચિત્ જ્ઞાનાવલોકેન કેચિદ્દુષ્ટૈસ્તુ નાષિતાઃ ॥ ૨૫॥

કાચં મણિં કાઞ્ચનમેકસૂત્રે
મુગ્ધા નિબધ્નન્તિ કિમત્ર ચિત્રમ્ ।
વિચારવાન્ પાણિનિરેકસૂત્રે
શ્વાનં યુવાનં મઘવાનમાહ ॥ ૨૬॥

કૌશિકેન સ કિલ ક્ષિતીશ્વરઃ રામમધ્વરવિઘાતશાન્તયે ।
કાકપક્ષધરમેત્ય યાચિતસ્તેજસાં હિ ન વયઃ સમીક્ષ્યતે ॥ ૨૭॥

કરાગ્રે વસતે લક્ષ્મીઃ કરમધ્યે સરસ્વતી ।
કરમૂલે તુ ગોવિન્દઃ પ્રભાતે કરદર્શનમ્ ॥ ૨૮॥

કિસલયાનિ કુતઃ કુસુમાનિ વા
ક્વ ચ ફલાનિ તથા નવવીરુધામ્ ।
અયમકારણકારુણિકો ન ચેત્
વિતરતીહ પયાંસિ પયોધરઃ ॥ ૨૯॥

કલ્પદ્રુમઃ કલ્પિતમેવ સૂતે
સા કામધુક્ કામિતમેવ દોગ્ધિ ।
ચિન્તામણિશ્ચિન્તિતમેવ દત્તે
સતાં તુ સઙ્ગઃ સકલં પ્રસૂતે ॥ ૩૦॥

કરોતિ સ્વમુખેનૈવ બહુધાન્યસ્ય ખણ્ડનમ્ ।
નમઃ પતનશીલાય મુસલાય ખલાય ચ ॥ ૩૧॥

કિન્તુ મદ્યં સ્વભાવેન યથૈવાન્નં તથા સ્મૃતમ્ ।
અયુક્તિયુક્તં રોગાય યુક્તિયુક્તં યથા સ્મૃતમ્ ॥ ૩૨॥

કવયઃ કિં ન પશ્યન્તિ કિં ન ભક્ષન્તિ વાયસાઃ ।
મદ્યપાઃ કિં ન જલ્પન્તિ કિં ન કુર્વન્તિ યોષિતઃ ॥ ૩૩॥

કાકે શૌચં દ્યૂતકારે ચ સત્યં
સર્પે શાન્તિઃ સ્ત્રીષુ કામોપશાન્તિઃ ।
ક્લીબે ધૈર્યમ્ મદ્યપે તત્ત્વચિન્તા
ભૂપે સખ્યં કેન દૃષ્ટં શ્રુતં વા ॥ ૩૪॥

કમલે કમલોત્પત્તિઃ શ્રૂયતે ન તુ દૃષ્યતે ।
બાલે તવ મુખામ્ભોજે કથમિન્દીવરદ્વયમ્ ॥ ૩૫॥

કથં ગુરૂનહં સંખ્યે દ્રોણં ચ મધુસૂદન ।
ઇષુભિઃ પ્રતિયોત્સ્યામિ પૂજાર્હાવરિસૂદન ॥ ૩૬॥

કાલો વા કારણં રાજ્ઞઃ રાજા વા કાલકારણં ।
ઇતિ તે સંશયો મા ભૂત્ રાજા કાલસ્ય કારણમ્ ॥ ૩૭॥

કિં તયા ક્રિયતે ધેન્વા યા ન સૂતે ન દુગ્ધદા ।
કોઽર્થઃ પુત્રેણ જાતેન યો ન વિદ્વાન્ન ભક્તિમાન્ ॥ ૩૮॥

કમલાસનકમલેક્ષણકમલારિકિરીટકમલભૃદ્વાહૈઃ ।
નુતપદકમલા કમલા સ્તુતપદકમલા કરોતુ મે કમલમ્ ॥ ૩૯॥

કરોતિ શોભામલકે સ્ત્રિયાઃ કો
દૃષ્યા ન કાન્તા વિધિના ચ કોક્તા ।
અઙ્ગે તુ કસ્મિન્ દહનં પુરારેઃ
સિન્દૂરબિન્દુઃ વિધવાલલાટે ॥ ૪૦॥

ક્ષુત્ક્ષામોઽપિ જરાકૃશોઽપિ શિથિલપ્રાયોઽપિ કષ્ટાં દશાં
આપન્નોઽપિ વિપન્નદીધિતિરપિ પ્રાણેષુ ગચ્છત્સ્વપિ ।
મત્તેભેન્દ્રવિભિન્નકુમ્ભકવલગ્રાસૈકબદ્ધસ્પૃહઃ
કિં જીર્ણં તૃણમત્તિ માનમહતામગ્રેસરઃ કેસરી ॥ ૪૧॥

કિં વાસસેતિ તત્ર વિચારણીયં
વાસઃ પ્રધાનં ખલુ યોગ્યતાયૈ ।
પીતામ્બરં વીક્ષ્ય દદૌ સ્વકન્યાં
દિગમ્બરં વીક્ષ્ય વિષં સમુદ્રઃ ॥ ૪૨॥

કેયૂરા ન વિભૂષયન્તિ પુરુષં હારા ન ચન્દ્રોજ્જ્વલાઃ
ન સ્નાનં ન વિલોપનં ન કુસુમં નાલઙ્કૃતા મૂર્ધજાઃ ।
વાણ્યેકા સમલઙ્કરોતિ પુરુષં યા સંસ્કૃતા ધાર્યતે
ક્ષીયન્તે ખલુ ભૂષણાનિ સતતં વાગ્ભૂષણં ભૂષણમ્ ॥ ૪૩॥

કુલીનૈઃ સહ સમ્પર્કં સજ્જનૈઃ સહ મિત્રતાં ।
જ્ઞાતિભિશ્ચ સહ મેલં કુર્વાણો ન વિનશ્યતિ ॥ ૪૪॥

કાવ્યશાસ્ત્રવિનોદેન કાલો ગચ્છતિ ધીમતામ્ ।
વ્યસનેન તુ મૂર્ખાણાં નિદ્રયા કલહેન વા ॥ ૪૫॥

કર્તવ્યમાચરન્ કાર્યમકર્તવ્યમનાચરન્ ।
તિષ્ઠતિ પ્રકૃતાચારે સ વૈ આર્ય ઇતિ સ્મૃતઃ ॥ ૪૬॥

ખલઃ કરોતિ દુર્વૃત્તં નૂનં ફલતિ સાધુષુ ।
દશાનનોઽહરત્ સીતાં બન્ધનં તુ મહોદધેઃ ॥ ૧॥

ખિન્નં ચાપિ સુભાષિતેન રમતે સ્વીયં મનઃ સર્વદા
શ્રુત્વાન્યસ્ય સુભાષિતં ખલુ મનઃ શ્રોતું પુનર્વાઞ્છતિ ।
અજ્ઞાન્ જ્ઞાનવતોઽપ્યનેન હિ વશીકર્તું સમર્થો ભવેત્
કર્તવ્યો હિ સુભાષિતસ્ય મનુજૈરાવશ્યકઃ સઙ્ગ્રહઃ ॥ ૨॥

ખદ્યોતો દ્યોતતે તાવત્ યાવત્ ન ઉદ્યતે શશિઃ ।
ઉદિતે તુ સહસ્રાંશે ન ખદ્યોતો ન ચન્દ્રમાઃ ॥ ૩॥

ગચ્છન્ ગગનમાર્ગેણ નિત્યં લોકાન્ પ્રકાશયન્ ।
વર્ધયન્ ચેતનાન્ સર્વાન્ પ્રદીપો રાજતે રવિઃ ॥ ૪॥

ગતે શોકો ન કર્તવ્યો ભવિષ્યં નૈવ ચિન્તયેત્ ।
વર્તમાનેન કાલેન વર્તયન્તિ વિચક્ષણાઃ ॥ ૫॥

ગણયન્તિ ન યે સૂર્યં વૃષ્ટિં શીતં ચ કર્ષકાઃ ।
યતન્તે ધાન્યલાભાય તૈઃ સાકં હિ વસામ્યહમ્ ॥ ૬॥

ગુરુર્બન્ધુરબન્ધૂનાં ગુરુશ્ચક્ષુરચક્ષુષામ્ ।
ગુરુઃ પિતા ચ માતા ચ સર્વેષાં ન્યાયવર્તિનામ્ ॥ ૭॥

ગુણૈરુત્તુઙ્ગતા યાતિ નોત્તુઙ્ગેનાસનેન વૈ ।
પ્રાસાદશિખરસ્થોઽપિ કાકો ન ગરુડાયતે ॥ ૮॥

ગુણાઃ કુર્વન્તિ દૂતત્ત્વં દૂરેઽપિ વસતાં સતામ્ ।
કેતકીગન્ધમાઘ્રાય સ્વયમાયાન્તિ ષટ્પદાઃ ॥ ૯॥

ગર્જસિ મેઘ ન યચ્છસિ તોયં ચાતકપક્ષી વ્યાકુલિતોઽહમ્ ।
દૈવાદિહ યદિ દક્ષિણવાતઃ ક્વ ત્વં ક્વાહં ક્વ ચ જલપાતઃ ॥ ૧૦॥

ગર્જતિ શરદિ ન વર્ષતિ વર્ષતિ વર્ષાસુ નિઃસ્વનો મેઘઃ ।
નીચો વદતિ ન કુરુતે વદતિ ન સાધુઃ કરોત્યેવ ॥ ૧૧॥

ગુરુશુશ્રૂષયા વિદ્યા પુષ્કલેન ધનેન વા ।
અથ વા વિદ્યયા વિદ્યા ચતૂર્થો નોપલભ્યતે ॥ ૧૨॥

ગાઙ્ગમમ્બુ સિતમમ્બુ યામુનં કજ્જલાભમુભયત્ર મજ્જતઃ ।
રાજહંસ તવ સૈવ શુક્લતા ચીયતે ન ચ ન ચાપચીયતે ॥ ૧૩॥

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુઃ ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુઃ સાક્ષાત્ પરબ્રહ્મ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૪॥

ગુણેષ્વનાદરં ભ્રાતઃ પૂર્ણશ્રીરપિ મા કૃથાઃ ।
સમ્પૂર્ણોઽપિ ઘટઃ કૂપે ગુણછેદાત્પતત્યધઃ ॥ ૧૫॥

ગૌરવં પ્રાપ્યતે દાનાન્નતુ વિત્તસ્ય સઞ્ચયાત્ ।
સ્થિતિરુચ્ચૈઃ પયોદાનાં પયોધીનામધસ્થિતિઃ ॥ ૧૬॥

ગવીશપત્રો નગજાપહારી કુમારતાતઃ શશિખણ્ડમૌલિઃ ।
લઙ્કેશસમ્પૂજિતપાદપદ્મઃ પાયાદનાદિઃ પરમેશ્વરો નઃ ॥ ૧૭॥

ગર્વાય પરપીડાયૈ દુર્જનસ્ય ધનં બલમ્ ।
સજ્જનસ્ય તુ દાનાય રક્ષણાય ચ તે સદા ॥ ૧૮॥

ઘટં ભિન્દ્યાત્ પટં છિન્દ્યાત્ કુર્યાદ્રાસભરોહણમ્ ।
યેન કેન પ્રકારેણ પ્રસિદ્ધઃ પુરુષો ભવેત્ ॥ ૧૯॥

ઘૃષ્ટં ઘૃષ્ટં પુનરપિ પુનશ્ચન્દનં ચારુગન્ધમ્

છિન્નં છિન્નં પુનરપિ પુનઃ સ્વાદુ ચૈવેક્ષુકાણ્ડમ્ ।
દગ્ધં દગ્ધં પુનરપિ પુનઃ કાઞ્ચનં કાન્તવર્ણમ્
પ્રાણાન્તેઽપિ હિ પ્રકૃતિવિકૃતિર્જાયતે નોત્તમાનામ્ ॥ ૨૦॥

ચન્દનં શીતલં લોકે ચન્દનાદપિ ચન્દ્રમાઃ ।
ચન્દ્રચન્દનયોર્મધ્યે શીતલા સાધુસઙ્ગતિઃ ॥ ૧॥

ચિતાં પ્રજ્વલિતાં દૃષ્ટ્વા વૈદ્યો વિસ્મયમાગતઃ ।
નાહં ગતો ન મે ભ્રાતા કસ્યેતદ્ હસ્તલાઘવમ્ ॥ ૨॥

ચતુરઃ સખિ મે ભર્તા યલ્લિખતિ તદ્ પરો ન વાચયતિ ।
તસ્માદપ્યધિકં મે સ્વયમપિ લિખિતં સ્વયં ન વાચયતિ ॥ ૩॥

ચિત્તે પ્રસન્ને ભુવનં પ્રસન્નં ચિત્તે વિષણ્ણે ભુવનં વિષણ્ણમ્ ।
અતોઽભિલાષો યદિ તે સુખે સ્યાચ્ચિત્તપ્રસાદે પ્રથમં યતસ્વ ॥ ૪॥

ચલત્યેકેન પાદેન તિષ્ઠત્યેકેન પણ્ડિતઃ ।
નાસમીક્ષ્યાપરં સ્થાનં પૂર્વમાયાતનં ત્યજેત્ ॥ ૫॥

ચિન્તનીયા હિ વિપદામાદાવેવ પ્રતિક્રિયા ।
ન કૂપખનનં યુક્તં પ્રદીપ્તે વહ્નિના ગૃહે ॥ ૬॥

ચિત્તે ભ્રાન્તિર્જાયતે મદ્યપાનાત્ ભ્રાન્તે ચિત્તે પાપચર્યામુપૈતિ ।
પાપં કૃત્વા દુર્ગતિં યાતિ મૂઢાસ્તસ્માન્મદ્યં નૈવ પેયં ન પેયમ્ ॥ ૭॥

ચિતા ચિન્તા સમાપ્રોક્તા બિન્દુમાત્રં વિશેષતા ।
સજીવં દહતે ચિન્તા નિર્જીવં દહતે ચિતા ॥ ૮॥

ચાતક ધૂમસમૂહં દૃષ્ટ્વા મા ધાવ વારિધરબુદ્ધ્યા ।
ઇહ હિ ભવિષ્યતિ ભવતો નયનયુગાદેવ વારિણં પૂરઃ ॥ ૯॥

છાયામન્યસ્ય કુર્વન્તિ તિષ્ઠન્તિ સ્વયમાતપે ।
ફલાન્યપિ પરાર્થાય વૃક્ષાઃ સત્પુરુષા ઇવ ॥ ૧૦॥

જીવનં સ્વં પરાર્થાય નિત્યં યચ્છત માનવાઃ ।
ઇતિ સન્દેશમાખ્યાતું સમુદ્રં યાન્તિ નિમ્નગાઃ ॥ ૧૧॥

જનૈર્જનહિતાર્થાય જનાનામેવ નિર્મિતં ।
લોકતન્ત્રં ભારતસ્ય વસુધાયાં વિરાજતે ॥ ૧૨॥

જીવિતે યસ્ય જીવન્તિ લોકે મિત્રાણિ બાન્ધવાઃ ।

સફલં જીવિતં તસ્ય કો ન સ્વાર્થાય જીવતિ ॥ ૧૩॥

જ્યેષ્ઠત્ત્વં જન્મના નૈવ ગુણૈર્જ્યેષ્ઠત્ત્વમુચ્યતે ।
ગુણાત્ ગુરુત્વમાયાતિ દુગ્ધં દધિ ધૃતં ક્રમાત્ ॥ ૧૪॥

જન્મદાતા અન્નદાતા વિદ્યાદાતા તથૈવ ચ ।
કન્યાદાતા ભયત્રાતા પઞ્ચૈતે પિતરઃ સ્મૃતાઃ ॥ ૧૫॥

તૃણં ખાદિતિ કેદારે જલં પિબતિ પલ્વલે ।
દુગ્ધં યચ્છતિ લોકેભ્યો ધેનુર્નો જનની પ્રિયા ॥ ૧॥

તદેવાસ્યં પરં મિત્રં યત્ર સઙ્ક્રમતિ દ્વયં ।
દૃષ્ટે સુખં ચ દુઃખં ચ પ્રતિચ્છાયેવ દર્પણે ॥ ૨॥

ત્યાગ એક ગુણઃ શ્લાઘ્યઃ કિમન્યૈર્ગુણરાષિભિઃ ।
ત્યાગાજ્જગતિ પૂજ્યન્તે પશુપાષાણપાદપાઃ ॥ ૩॥

તાતેન કથિતં પુત્ર પત્રં લિખ મમાજ્ઞયા ।
નતેન લિખિતં પત્રં પિતુરાજ્ઞા મ લઙ્ઘિતા ॥ ૪॥

તે યાન્તિ તીર્થેષુ બુધાઃ યે શમ્ભોર્દૂરવર્તિનઃ ।
યસ્ય ગૌરીશ્વરશ્ચિત્તે તીર્થં ભોજ પરં હિ સઃ ॥ ૫॥

ત્યજન્તિ મિત્રાણિ ધનૈર્વિહીનં પુત્રાશ્ચ દારાશ્ચ સુહૃજ્જનાશ્ચ ।
તમર્થવન્તં પુનરાશ્રયન્તિ અર્થો હિ લોકે મનુષસ્ય બન્ધુઃ ॥ ૬॥

તાડિતાઃ પીડિતા યે સ્યુસ્તાન્મમેત્યભ્યુદીરયેત્ ।
સ સાધુરવગન્તવ્યસ્તત્ર દ્રષ્ટવ્ય ઈશ્વરઃ ॥ ૭॥

તૃણાદપિ લઘુસ્તૂલં તૂલાદપિ ચ યાચકઃ ।
વાયુના કિં ન નીતોઽસૌ મામયં પ્રાર્થયેદિતિ ॥ ૮॥

તુષ્ટોઽપિ રાજા યદિ સેવકેભ્યઃ ભાગ્યાત્પરં નૈવ દદાતિ કિઞ્ચિત્ ।
અહર્નિશં વર્ષતિ વારિવાહાસ્તથાપિ પત્રત્રિતયઃ પલાશઃ ॥ ૯॥

તિલવત્સ્નિગ્ધં મનોઽસ્તુ વાણ્યાં ગુડવન્માધુર્યમ્
તિલગુડલડ્ડુકવત્ સમ્બન્ધે અસ્તુ સુવૃત્તત્વમ્ ।
અસ્તુ વિચારે શુભસઙ્ક્રમણં મઙ્ગલાય યશસે
કલ્યાણી સઙ્ક્રાન્તિરસ્તુ વઃ સદાહમાશંસે ॥ ૧૦॥

દધિ મધુરં મધુ મધુરં દ્રાક્ષા મધુરા સુધાપિ મધુરૈવ ।

તસ્ય તદેવ હિ મધુરં યસ્ય મનો યત્ર સંલગ્નમ્ ॥ ૧॥

દ્રાક્ષા મ્લાનમુખી જાતા શર્કરા ચાશ્મતાઙ્ગતા ।
સુભાશિતરસસ્યાગ્રે સુધા ભીતા દિવઙ્ગતા ॥ ૨॥

દક્ષિણે લક્ષ્મણો યસ્ય વામે તુ જનકાત્મજા ।
પુરતો મારુતિર્યસ્ય તં વન્દે રઘુનન્દનમ્ ॥ ૩॥

દાનેન તુલ્યં સુહૃદાસ્તિ નાન્યો લોભાચ્ચ નાન્યોઽસ્તિ રિપુઃ પૃથિવ્યામ્ ।
વિભૂષણં શીલસમં ન ચાન્યત્ સન્તોષતુલ્યં ધનમસ્તિ નાન્યત્ ॥ ૪॥

દરિદ્રતા ધીરતયા વિરાજતે કુરૂપતા શીલગુણેન રાજતે ।
કુભોજનં ચોષ્ણતયા વિરાજતે કુવસ્ત્રતા શુભ્રતયા વિરાજતે ॥ ૫॥

દુર્જનઃ પ્રિયવાદીતિ નૈતદ્વિશ્વાસકારણમ્ ।
મધુ તિષ્ઠતિ જિંવ્હાગ્રે હૃદયે તુ હલાહલમ્ ॥ ૬॥

દુર્જનેન સમં વૈરં પ્રીતિં ચાપિ ન કારયેત્ ।
ઉષ્ણો દહતિ ચાઙ્ગારઃ શીતઃ કૃષ્ણાયતે કરમ્ ॥ ૭॥

દાતવ્યં ભોક્તવ્યં ધનવિષયે સઞ્ચયો ન કર્તવ્યઃ ।
પશ્યેહ મધુકરીણાં સઞ્ચિતાર્થમ્ હરન્ત્યન્યે ॥ ૮॥

દાતા ક્ષમી ગુણગ્રાહી સ્વામી દુઃખેન લભ્યતે ।
શુચિર્દક્ષોઽનુરક્તશ્ચ જાને ભૃત્યોઽપિ દુર્લભઃ ॥ ૯॥

દુર્જનદૂષિતમનસાં પુંસામ્ સુજનેઽપિ નાસ્તિ વિશ્વાસઃ ।
દુગ્ધેન દગ્ધવદનસ્તક્રં ફૂત્કૃત્ય પામરઃ પિબતિ ॥ ૧૦॥

દૈવમવેતિ સંચિન્ત્ય સ્વોદ્યોગં ન નરસ્ત્યજેત્ ।
અનુદ્યમેન કસ્તૈલં તિલેભ્યઃ પ્રાપ્તુમર્હતિ ॥ ૧૧॥

દુન્દુભિસ્તુ નિતરામચેતનસ્તન્મુખાદપિ ધનં ધનં ધનમ્ ।
ઇત્થમેવ નિનાદઃ પ્રવર્તતે કિં પુનર્યદિ ભવેત્સચેતનઃ ॥ ૧૨॥

દુર્જનૈઃ સહ વાસો હિ ધ્રુવં નાશાય કલ્પતે ।
કાકસ્ય સહવાસેન હંસો નષ્ટો વૃથા પુરા ॥ ૧૩॥

દ્વાવિમૌ પુરુષૌ લોકે સૂર્યમણ્ડલભેદિનૌ ।
પરિવ્રાટ્ યોગયુક્તશ્ચ રણસ્યાભિમુખે હતઃ ॥ ૧૪॥

દ્વન્દ્વો દ્વિગુરપિ ચાહં મદ્ગેહે નિત્યમવ્યયી ભાવઃ ।
તત્પુરુષ કર્મ ધારય યેનાહં સ્યાં બહુવ્રીહિઃ ॥ ૧૫॥

દાનં ભોગો નાશસ્તિસ્રો ગતયો ભવન્તિ વિત્તસ્ય ।
યો ન દદાતિ ન ભુઙ્ક્તે તસ્ય તૃતીયા ગતિર્ભવતિ ॥ ૧૬॥

દુર્જનઃ પરિહર્તવ્યો વિદ્યયાલઙ્કૃતોઽપિ સન્ ।
મણિના ભૂષિતઃ સર્પઃ કિમસૌ ન ભયઙ્કરઃ ॥ ૧૭॥

દિવસેનૈવ તત્કુર્યાદ્ યેન રાત્રૌ સુખં વસેત્ ।
પૂર્વે વયસિ તત્કુર્યાદ્ યેન વૃદ્ધઃ સુખી ભવેત્ ॥ ૧૮॥

દેશાટનં રાજસભાપ્રવેશો વ્યાપારિવિદ્વજ્જનસઙ્ગતિશ્ચ ।
સર્વેષુ શાસ્ત્રેષ્વવલોકનં ચ ચાતુર્યમૂલાનિ ભવન્તિ પઞ્ચ ॥ ૧૯॥

દાતવ્યમિતિ યદ્દાનં દીયતેઽનુપકારિણે ।
દેશે કાલે ચ પાત્રે ચ તદ્દાનં સાત્વિકં સ્મૃતમ્ ॥ ૨૦॥

દર્શને સ્પર્શણે વાપિ શ્રવણે ભાષણેઽપિ વા ।
યત્ર દ્રવત્યન્તરઙ્ગં સ સ્નેહ ઇતિ કથ્યતે ॥ ૨૧॥

દદાતિ પ્રતિગૃહ્ણાતિ ગુહ્યમાખ્યાતિ પૃચ્છતિ ।
ભુઙ્ક્તે ભોજયતે ચૈવ ષડ્વિધં પ્રીતિલક્ષણમ્ ॥ ૨૨॥

દારિદ્ર્યાન્મરણાદ્વા મરણં મે રોચતે ન દારિદ્ર્યં ।
અલ્પક્લેશં મરણં દારિદ્ર્યં ત્વનન્તકં દુઃખમ્ ॥ ૨૩॥

દાતુર્યાચકયોર્ભેદઃ કરાભ્યામેવ દર્શિતઃ ।
એકસ્ય ગચ્છતોઽધસ્તાદુપર્યન્યસ્ય તિષ્ઠતામ્ ॥ ૨૪॥

ધનમલબ્ધં કાઙ્ક્ષેત લબ્ધં રક્ષેદવેક્ષણાત્ ।
રક્ષિતં વર્ધયેત્ સમ્યક્ વૃદ્ધં તીર્થેષુ નિક્ષિપેત્ ॥ ૨૫॥

ધવલયતિ સમગ્રં ચન્દ્રમા જીવલોકં
કિમિતિ નિજકલઙ્કં નાત્મસંસ્થં પ્રમાર્ષ્ટિ ।
ભવતિ વિદિતમેતદ્ પ્રાયશઃ સજ્જનાનાં
પરહિતનિરતાનામાદરો નાત્મકાર્યે ॥ ૨૬॥

ધૃતિઃ ક્ષમા દમોઽસ્તેયં શૌચમિન્દ્રિયનિગ્રહઃ ।
ધીર્વિદ્યા સત્યમક્રોધો દશકં ધર્મલક્ષણમ્ ॥ ૨૭॥

ન ધૈર્યેણ વિના લક્ષ્મીર્ન શૌર્યેણ વિના જયઃ ।
ન જ્ઞાનેન વિના મોક્ષો ન દાનેન વિના યશઃ ॥ ૧॥

નારિકેલસમાકારા દૃશ્યન્તેઽપિ હિ સજ્જનાઃ ।
અન્યે બદરિકાકારા બહિરેવ મનોહરાઃ ॥ ૨॥

ન હિ કશ્ચિત્ વિજાનાતિ કિં કસ્ય શ્વો ભવિશ્યતિ ।
અતઃ શ્વઃ કરણીયાનિ કુર્યાદદ્યૈવ બુદ્ધિમાન્ ॥ ૩॥

નરો હિ મલિનૈર્વસ્ત્રૈઃ યત્ર ક્વાપિ નિષીદતિ ।
તથા ચલિતશીલસ્તુ શેષં શીલં ન રક્ષતિ ॥ ૪॥

નરસ્યાભરણં રૂપં રૂપસ્યાભરણં ગુણઃ ।
ગુણસ્યાભરણં જ્ઞાનં જ્ઞાનસ્યાભરણં ક્ષમા ॥ ૫॥

ન કશ્ચિત્ કસ્યચિત્ મિત્રં ન કશ્ચિત્ કસ્યચિત્ રિપુઃ ।
કારણેનૈવ જાયન્તે મિત્રાણિ રિપવોઽપિ વા ॥ ૬॥

નાગો ભાતિ મદેન કં જલરુહૈર્નિત્યોત્સવૈર્મન્દિરં
શીલેનૈવ નરો જવેન તુરગઃ પૂર્ણેન્દુના શર્વરી ।
વાણી વ્યાકરણેન હંસમિથુનૈર્વાપી સભા પણ્ડિતૈઃ
સત્પુત્રેણ કુલો બુધેન વસુધા કીર્ત્યા ચ લોકત્રયમ્ ॥ ૭॥

ન ભૂતપૂર્વમ્ ન કદાપિ વાર્તા હેમ્નઃ કુરઙ્ગો ન કદાપિ દૃષ્ટઃ ।
તથાપિ તૃષ્ણા રઘુનન્દનસ્ય વિનાશકાલે વિપરીતબુદ્ધિઃ ॥ ૮॥

ન હિ પ્રાણાત્ પ્રિયતરં લોકે કિઞ્ચન વિદ્યતે ।
તસ્માત્ દયાં નરઃ કુર્યાત્ યથાત્મનિ તથા પરે ॥ ૯॥

નમસ્તે સર્વદેવાનાં વરદાસિ હરેઃ પ્રિયા ।
યા ગતિસ્ત્વત્પ્રસન્નાનાં સા મે સ્યાત્તવ દર્શનાત્ ॥ ૧૦॥

નવં પુરાતનં વાપિ લેખં પશ્યન્તિ પણ્ડિતાઃ ।
સારમાસાદ્ય તુષ્યન્તિ નિઃસારં ચ ત્યજન્તિ તે ॥ ૧૧॥

નમસ્તે શારદે દેવી વીણા પુસ્તકધારિણિ ।
વિદ્યારમ્ભં કરિષ્યામિ પ્રસન્ના ભવ સર્વદા ॥ ૧૨॥

ન ચોરહાર્યં ન ચ રાજહાર્યં ન ભ્રાતૃભાજ્યં ન ચ ભારકારી ।
વ્યયે કૃતે વર્ધત એવ નિત્યં વિદ્યાધનં સર્વધનપ્રધાનમ્ ॥ ૧૩॥

ન દુર્જનઃ સજ્જનતામુપૈતિ બહુપ્રકારૈરપિ સેવ્યમાનઃ ।
ભૂયોऽપિ સિક્તઃ પયસા ઘૃતેન ન નિમ્બવૃક્ષઃ મધુરત્વમેતિ ॥ ૧૪॥

નમન્તિ ફલિતા વૃક્ષા નમન્તિ ચ બુધા જનાઃ ।
શુષ્કકાષ્ઠાનિ મૂર્ખાશ્ચ ભિદ્યન્તે ન નમન્તિ ચ ॥ ૧૫॥

નક્રઃ સ્વસ્થાનમાસાદ્ય રાજેન્દ્રમપિ કર્ષતિ ।
સ એવ પ્રચ્યુતઃ સ્થાનાચ્છુનાપિ પરિભૂયતે ॥ ૧૬॥

નમસ્તે શારદે દેવી કાશ્મીરપુરવાસિનિ ।
ત્વામહં પ્રાર્થયે દેવિ વિદ્યાદાનં ચ દેહિ મે ॥ ૧૭॥

નિર્વિષેણાપિ સર્પેણ કર્તવ્યા મહતી ફણા ।
વિષમસ્તુ ન ચાપ્યસ્તુ ફટાટોપો ભયઙ્કરઃ ॥ ૧૮॥

ન હિ જ્ઞાનસમં લોકે પવિત્રં ચાન્યસાધનં ।
વિજ્ઞાનં સર્વલોકાનામુત્કર્ષાય સ્મૃતં ખલુ ॥ ૧૯॥

નરનારીસમુત્પન્ના સા સ્ત્રી દેહવિવર્જિતા ।
અમુખી કુરુતે શબ્દં જાતમાત્રા વિનશ્યતિ ॥ ૨૦॥

ન ગૃહં ગૃહમિત્યાહુર્ગૃહિણી ગૃહમુચ્યતે ।
ગૃહં તુ ગૃહિણીહીનં કાન્તારાદતિરિચ્યતિ ॥ ૨૧॥

ન દેવો વિદ્યતે કાષ્ઠે ન પાષાણે ન મૃન્મયે ।
ભાવે હિ વિદ્યતે દેવસ્તસ્માદ્ભાવો હિ કારણમ્ ॥ ૨૨॥

ન વિદ્યયા નૈવ કુલેન ગૌરવં જનાનુરાગો ધનિકેષુ સર્વદા ।
કપાલિના મૌલિધૃતાપિ જાહ્નવી પ્રયાતિ રત્નાકરમેવ સર્વદા ॥ ૨૩॥

નિન્દન્તુ નીતિનિપુણા યદિ વા સ્તુવન્તુ
લક્ષ્મીઃ સ્થિરા ભવતુ ગચ્છતુ વા યથેષ્ટમ્ ।
અદ્યૈવ વા મરણમસ્તુ યુગાન્તરે વા
ન્યાય્યાત્પથઃ પ્રવિચલન્તિ પદં ન ધીરાઃ ॥ ૨૪॥

ન ભીતો મરણાદસ્મિ કેવલં દૂષિતં યશઃ ।
વિશુદ્ધસ્ય હિ મે મૃત્યુઃ પુત્રજન્મસમં કિલ ॥ ૨૫॥

નમો દીપશિખે તુભ્યમન્ધકારં નિરસ્યસિ ।
પ્રયચ્છસિ ધનં સ્વાસ્થ્યં કલ્યાણાય ચ જાયસે ॥ ૨૬॥

નાભિષેકો ન સંસ્કારઃ સિંહસ્ય ક્રિયતે વને ।
વિક્રમાર્જિતસત્ત્વસ્ય સ્વયમેવ મૃગેન્દ્રતા ॥ ૨૭॥

ન વિત્તં દર્શયેત્પ્રાજ્ઞઃ કસ્યચિત્સ્વલ્પમપ્યહો ।
મુનેરપિ યતસ્તસ્ય દર્શનાચ્ચલતે મનઃ ॥ ૨૮॥

ન ભૂપ્રદાનં ન સુવર્ણદાનં ન ગોપ્રદાનં ન તથાન્નદાનમ્ ।
યથા વદન્તીહ મહાપ્રદાનં સર્વેષુ દાનેષ્વભયપ્રદાનમ્ ॥ ૨૯॥

ન પણ્ડિતાઃ સાહસિકા ભવન્તિ શ્રુત્વાપિ તે સન્તુલયન્તિ તત્ત્વમ્ ।
તત્ત્વં સમાદાય સમાચરન્તિ સ્વાર્થં પ્રકુર્વન્તિ પરસ્ય ચાર્થમ્ ॥ ૩૦॥

નૈનં છિન્દન્તિ શસ્ત્રાણિ નૈનં દહતિ પાવકઃ ।
નચૈનં ક્લેદયત્યાપો ન શોષયતિ મારુતઃ ॥ ૩૧॥

નાનાધર્મનિગૂઢતત્ત્વનિચિતા યત્સંસ્કૃતી રાજતે
સેયં ભારતભૂર્નિતાન્તરુચિરા માતૈવ નઃ સર્વદા ।
તસ્યા ઉન્નતિહેતવે હિ ભવતાં જ્ઞાનં તથા મે બલમ્
સમ્પન્ના બલશાલિની વિજયતામ્ મે માતૃભૂઃ સર્વદા ॥ ૩૨॥

નરપતિહિતકર્તા દ્વેષ્યતાં યાતિ લોકે
જનપદહિતકર્તા ત્યજ્યતે પાર્થિવેન ।
ઇતિ મહતિ વિરોધે વિદ્યમાને સમાને
નૃપતિજનપદાનાં દુર્લભઃ કાર્યકર્તા ॥ ૩૩॥

નાયં પ્રયાતિ વિકૃતિં વિરસો ન યઃ સ્યાત્
ન ક્ષીયતે બહુજનૈર્નિતરાં નિપીતઃ ।
જાડ્યં નિહન્તિ રુચિમેતિ કરોતિ તૃપ્તિં
નૂનં સુભાશિતરસોઽન્યરસાતિશાયી ॥ ૩૪॥

નિવૃત્તો યસ્તુ મદ્યેભ્યઃ જિતાત્મા બુદ્ધિપૂર્વકઃ ।
વિકારૈઃ સ્પૃશ્યતે જાતુ ન સ શારીરમાનસૈઃ ॥ ૩૫॥

નિઃસ્વો વષ્ટિ શતં શતી દશશતં લક્ષં સહસ્રાધિપઃ
લક્ષેશઃ ક્ષિતિપાલતાં ક્ષિતિપતિઃ ચક્રેશતાં વાઞ્છતિ ।
ચક્રેષઃ પુનરિન્દ્રતાં સુરપતિઃ બ્રાહ્મં પદં વાઞ્છતિ
બ્રહ્મા શૈવપદં શિવો હરિપદં ચાશાવધિં કો ગતઃ ॥ ૩૬॥

ન વ્યાધિર્ન વિષં નાપત્તથા નાધિશ્ચ ભૂતલે ।
ખેદાય સ્વશરીરસ્થં મૌર્ખ્યમેકં યથા નૃણામ્ ॥ ૩૭॥

ન તેન સ્થવિરો ભવતિ યેનાસ્ય પલિતં શિરઃ ।
સ વૈ યુવાપ્યધીયાનો દેવાસ્તં સ્થવિરં વિદુઃ ॥ ૩૮॥

નિર્ગુણેશ્વપિ સત્ત્વેષુ દયાં કુર્વન્તિ સાધવઃ ।
ન હિ સંહરતે જ્યોત્સ્નાં ચન્દ્રશ્ચાણ્ડાલવેશ્મનઃ ॥ ૩૯॥

નૃત્યં મયૂરાઃ કુસુમાનિ વૃક્ષાઃ દર્ભાનુપાત્તાન્વિજહુર્હરિણ્યઃ ।
તસ્યાઃ પ્રપન્ને સમદુઃખભાવમત્યન્તમાસીદ્રુદિતં વનેઽપિ ॥ ૪૦॥

નૃપસ્ય વર્ણાશ્રમપાલનં યત્સ એવ ધર્મો મનુના પ્રણીતઃ
નિર્વાસિતાપ્યેવમતસ્ત્વયાહં તપસ્વિસામાન્યમવેક્ષણીયા ।
તથેતિ તસ્યા પ્રતિગૃહ્ય વાચં રામાનુજે દૃષ્ટિપથં વ્યતીતે
સા મુક્તકણ્ઠં વ્યસનાતિભારાચ્ચક્રન્દ વિગ્ના કુરરીવ ભૂયઃ ॥ ૪૧॥

નક્ષત્રભૂષણં ચન્દ્રો નારીણાં ભૂષણં પતિઃ ।
પૃથિવીભૂષણં રાજા વિદ્યા સર્વસ્ય ભૂષણં ॥ ૪૨॥

નમોઽસ્તુ તે વ્યાસ વિશાલબુદ્ધે ફુલ્લારવિન્દાયતપત્રનેત્ર ।
યેન ત્વયા ભારતતૈલપૂર્ણઃ પ્રજ્વાલિતો જ્ઞાનમયઃ પ્રદીપઃ ॥ ૪૩॥

નમઃ સર્વવિદે તસ્મૈ વ્યાસાય કવિવેધસે ।
ચક્રે પુણ્યં સરસ્વત્યા યો વર્ષમિવ ભારતમ્ ॥ ૪૪॥

પરિત્રાણાય સાધૂનાં વિનાશાય ચ દુશ્કૃતામ્ ।
ધર્મસંસ્થાપનાર્થાય સમ્ભવામિ યુગે યુગે ॥ ૧॥

પરોપકારકરણં નૂનં હસ્તસ્ય ભૂષણમ્ ।
પૂજ્યેષુ ચ નમસ્કારઃ ઉત્તરાઙ્ગસ્ય ભૂષણમ્ ॥ ૨॥

પોષયન્તિ પયો દત્ત્વા યથા વત્સાન્ તથા જનાન્ ।
નિત્યં સમાનયા પ્રીત્યા ધેનવો માતરો નૃણામ્ ॥ ૩॥

પાદપાનાં ભયં વાતાત્ પદ્માનાં શિશિરાદ્ભયમ્ ।
પર્વતાનાં ભયં વજ્રાત્ સાધૂનાં દુર્જનાદ્ભયમ્ ॥ ૪॥

પ્રથમે નાર્જિતા વિદ્યા દ્વીતીયે નાર્જિતં ધનં ।
તૃતીયે નાર્જિતં પુણ્યં ચતૂર્થે કિં કરિષ્યતિ ॥ ૫॥

પિબન્તિ નદ્યઃ સ્વયમેવ નામ્ભઃ સ્વયં ન ખાદન્તિ ફલાનિ વૃક્ષાઃ ।
નાદન્તિ સ્વસ્યં ખલુ વારિવાહાઃ પરોપકારાય સતાં વિભૂતયઃ ॥ ૬॥

પરોપકારશૂન્યસ્ય ધિઙ્ મનુષ્યસ્ય જીવનમ્ ।
યાવન્તઃ પશવસ્તેશાં ચર્માપ્યુપકરોતિ હિ ॥ ૭॥

પક્ષિણાં બલમાકાશો મત્સ્યાનામુદકં બલમ્ ।
દુર્બલસ્ય બલં રાજા બાલાનાં રોદનં બલમ્ ॥ ૮॥

પિપીલિકાર્જિતં ધાન્યં મક્ષિકાસઞ્ચિતં મધુ ।
લુબ્ધેન સઞ્ચિતં દ્રવ્યં સમૂલં હિ વિનશ્યતિ ॥ ૯॥

પરોપદેશે પાણ્ડિત્યં સર્વેષાં સુકરં નૃણામ્ ।
વિસ્મરન્તીહ શિષ્ટત્ત્વં સ્વકાર્યે સમુપસ્થિતે ॥ ૧૦॥

પૃથિવ્યાં ત્રીણિ રત્નાનિ જલમન્નં સુભાષિતં ।
મૂઢૈઃ પાષાણખણ્ડેષુ રત્નં સંજ્ઞા વિધીયતે ॥ ૧૧॥

પરાન્નં પ્રાપ્ય દુર્બુદ્ધે મા પ્રાણેષુ દયાં કુરુ ।
દુર્લભાનિ પરાન્નાનિ પ્રાણા જન્મનિ જન્મનિ ॥ ૧૨॥

પાનીયં પાતુમિચ્છામિ ત્વત્તઃ કમલલોચને ।
યદિ દાસ્યસિ નેચ્છામિ ન દાસ્યસિ પિબામ્યહમ્ ॥ ૧૪॥

પ્રારભ્યતે ન ખલુ વિઘ્નભયેન નીચૈઃ
પ્રાભ્ય વિઘ્નવિહતા વિરમન્તિ મધ્યાઃ ।
વિઘ્નૈઃ પુનઃ પુનરપિ પ્રતિહન્યમાનાઃ
પ્રારબ્ધમુત્તમજના ન પરિત્યજન્તિ ॥ ૧૪॥

પ્રલયે પવનાઘાતૈઃ પ્રચલન્તિ નગા અપિ ।
કૃચ્છેઽપિ ન ચલત્યેવ ધીરાણાં નિશ્ચલા મતિઃ ॥ ૧૫॥

પુસ્તકેષુ ચ નાધીતં નાધીતં ગુરુસન્નિધૌ ।
ન શોભતે સભામધ્યે હંસમધ્યે બકો યથા ॥ ૧૬॥

પુસ્તકસ્થા તુ યા વિદ્યા પરહસ્તગતં ધનં ।
કાર્યકાલે સમુત્પન્ને ન સા વિદ્યા ન તદ્ધનમ્ ॥ ૧૭॥

પરિશ્રમો મિતાહારઃ ભેષજે સુલભે મમ
નિત્યં તે સેવમાનસ્ય વ્યાધિર્ભ્યો નાસ્તિ મે ભયમ્ ।

ધનિકસ્તુ તદાકર્ણ્ય સ્વાયત્તં ભેષજદ્વયં
સેવનીયં તદેવેતિ નિશ્ચિત્ય ગૃહમાગતઃ ॥ ૧૮॥

પ્રાણનાશેઽપિ કુર્વીત પરેષાં માનવો હિતમ્ ।
દિશઃ સુગન્ધયત્યેવ વહ્નૌ ક્ષિપ્તોઽપિ ચન્દનઃ ॥ ૧૯॥

પરાધિકારચર્ચામ્ યઃ કુર્યાત્ સ્વામિહિતેચ્છયા ।
સ નિષીદતિ ચીત્કારાત્ ગર્દભસ્તાડિતો યથા ॥ ૨૦॥

પઙ્ગો ધન્યસ્ત્વમસિ ન ગૃહં યાસિ યોઽર્થી પરેષામ્
ધન્યોઽન્ધ ત્વં ધનમવદતાં નેક્ષસે યન્મુખાનિ ।
શ્લાઘ્યો મૂક ત્વમસિ કૃપણં સ્તૌષિ નાર્થાશયા યઃ
સ્તોતવ્યસ્ત્વં બધિર ગિરં યઃ ખલાનાં ન શ‍ૃણોઽસિ ॥ ૨૧॥

પુષ્પેઽસ્તિ ગન્ધો મધુરો નારિકેલે જલં તથા ।
પરમેશસ્ય સા લીલા યતઃ સ સર્વશક્તિમાન્ ॥ ૨૨॥

પ્રારમ્ભગુર્વી ક્ષયિણી ક્રમેન ગુર્વી પુરા વૃદ્ધિમતી ચ પશ્ચાત્ ।
દિનસ્ય પૂર્વાર્ધપરાર્ધભિન્ના છાયેવ મૈત્રિઃ ખલસજ્જનાનામ્ ॥ ૨૩॥

પઞ્ચૈતે દેવતરવઃ મન્દારઃ પારિજાતકઃ ।
સન્તાનઃ કલ્પવૃક્ષશ્ચ પુંસિ વા હરિચન્દનમ્ ॥ ૨૪॥

પ્રાણભૂતઞ્ચ યત્તત્ત્વં સારભૂતં તથૈવ ચ ।
સંસ્કૃતૌ ભારતસ્યાસ્ય તન્મે યચ્છતુ સંસ્કૃતમ્ ॥ ૨૫॥

પ્રાણાં ત્યજતિ દેશાર્થમ્ પણ્ડિતાનાં સહાયકઃ ।
ય આચરતિ કલ્યાણં લોકે માનં સ વિન્દતિ ॥ ૨૬॥

પ્રથમવયસિ પીતં તોયમલ્પં સ્મરન્તઃ
શિરસિ નિહિતભારા નારિકેલા નરાણામ્ ।
દદતિ જલમનલ્પાસ્વાદમાજીવિતાન્તં
ન હિ કૃતમુપકારં સાધવો વિસ્મરન્તિ ॥ ૨૭॥

પશ્ચાદ્બર્હં વહતિ વિપુલં ચિત્રિતં દીપ્તિમન્તમ્
કાલે કાલે વ્યજનમિવ તં વિસ્તૃતં યઃ કરોતિ ।
શીર્ષે કાન્તં વહતિ તરલં પિચ્છકાનાં કલાપં
કોઽયં પક્ષી રુચિરવદનો નર્તને ચ પ્રવીણઃ ॥ ૨૮॥

પલાશમુકુલભ્રાન્ત્યા શુકતુણ્ડે પતત્યલિઃ ।
સોઽપિ જમ્બૂફલભ્રાન્ત્યા તમલિં ધર્તુમિચ્છતિ ॥ ૨૯॥

પુરા કવીનાં ગણનાપ્રસઙ્ગે કનિષ્ઠિકાધિષ્ઠિતકાલિદાસઃ ।
અદ્યાપિ તત્તુલ્ય કવેરભાવાત્ અનામિકા સાર્થવતી બભૂવ ॥ ૩૦॥

પારાશર્યવચઃ સરોજમમલં ગીતાર્થગન્ધોત્કટમ્
નાનાખ્યાનકકેસરં હરિકથાસમ્બોધનાબોધિતમ્ ।
લોકે સજ્જનષટ્પદૈરહરહઃ પેપીયમાનં મુદા
ભૂયાદ્ભારતપઙ્કજં કલિમલપ્રધ્વંસિ નઃ શ્રેયસે ॥ ૩૧॥

પાર્થાય પ્રતિબોધિતાં ભગવતા નારાયણેન સ્વયમ્
વ્યાસેન ગ્રથિતાં પુરાણમુનિના મધ્યે મહાભારતમ્ ।
અદ્વૈતામૃતવર્ષિણીં ભગવતીમષ્ટાદશાધ્યાયિનીં
અમ્બ ત્વામનુસન્દધામિ ભગવદ્ગીતે ભવદ્વેષિણીમ્ ॥ ૩૨॥

પ્રમદા મદિરા લક્ષ્મીઃ વિજ્ઞેયા ત્રિવિધા સુરા ।
દૃષ્ટ્વૈવોન્માદયત્યેકા પીતા ચાન્યાતિસઞ્ચયાત્ ॥ ૩૩॥

પુનર્વિત્તં પુનર્મિત્રં પુનર્ભાર્યા પુનર્મહી ।
એતત્ સર્વં પુનર્લભ્યં ન શરીરં પુનઃ પુનઃ ॥ ૩૪॥

પ્રિયવાક્યપ્રદાનેન સર્વે તુષ્યન્તિ જન્તવઃ ।
તસ્માત્ તદેવ વક્તવ્યં વચને કિં દરિદ્રતા ॥ ૩૫॥

પિનાકફણિબાલેન્દુભસ્મમન્દાકિનીયુતા ।
પવર્ગરચિતા મૂર્તિરપવર્ગપ્રદાસ્તુ નઃ ॥ ૩૬॥

પિણ્ડે પિણ્ડે મતિર્ભિન્ના કુણ્ડે કુણ્ડે નવં પયઃ ।
જાતૌ જાતૌ નવાચારાઃ નવા વાણી મુખે મુખે ॥ ૩૭॥

ફણિનો બહવઃ સન્તિ ભેકભક્ષણતત્પરાઃ ।
એક એવ હિ શેષોઽયં ધરણીધરણક્ષમઃ ॥ ૧॥

ફલં સ્વેચ્છાલભ્યં પ્રતિદિનમખેદં ક્ષિતિરુહાં
પયઃ સ્થાને સ્થાને શિશિરમધુરં પુણ્યસરિતાં ।
મૃદુસ્પર્શા શય્યા સુલલિતલતાપલ્લવમયી
સહન્તે સન્તાપં તદપિ ધનિનાં દ્વારિ કૃપણાઃ ॥ ૨॥

બાલો વા યદિ વા વૃદ્ધો યુવા વા ગૃહમાગતઃ ।
તસ્ય પૂજા વિધાતવ્યા સર્વસ્યાભ્યાગતો ગુરુઃ ॥ ૩॥

બહુભિર્ન વિરોદ્ધવ્યં દુર્જનૈઃ સજ્જનૈરપિ ।
સ્ફુરન્તમપિ નાગેન્દ્રં ભક્ષયન્તિ પિપીલિકાઃ ॥ ૪॥

બાલસ્યાપિ રવેઃ પાદાઃ પતન્ત્યુપરિ ભૂભૃતાં ।
તેજસા સહ જાતાનાં વયઃ કુત્રોપયુજ્યતે ॥ ૫॥

બુભુક્ષિતઃ કિં ન કરોતિ પાપં ક્ષીણા નરા નિષ્કરુણા ભવન્તિ ।
આખ્યાહિ ભદ્રે પ્રિયદર્શનસ્ય ન ગંગદત્તઃ પુનરેતિ કૂપં ॥ ૬॥

બ્રહ્મન્નધ્યયનસ્ય નૈષ સમયસ્તૂષ્ણીં બહિઃ સ્થીયતાં
સ્વલ્પં જલ્પ બૃહસ્પતે જડમતે, નૈષા સભા વજ્રિણઃ ।
વીણાં સંહર નારદ સ્તુતિકથાલાપૈરલં તુમ્બુરો
સીતારલ્લકભલ્લભગ્નહૃદયઃ સ્વસ્થો ન લંકેશ્વરઃ ॥ ૭॥

ભાષાસુ મુખ્યા મધુરા દિવ્યા ગીર્વાણભારતી ।
તસ્યાં હિ કાવ્યં મધુરં તસ્માદપિ સુભાશિતમ્ ॥ ૮॥

ભીતેભ્યશ્ચાભયં દેયં વ્યાધિતેભ્યસ્તથૌષધમ્ ।
દેયા વિદ્યાર્થિને વિદ્યા દેયમન્નં ક્ષુધાતુરે ॥ ૯॥

ભોજનાન્તે ચ કિં પેયં જયન્તઃ કસ્ય વૈ સુતઃ ।
કથં વિષ્ણુપદં પ્રોક્તં તક્રં શક્રસ્ય દુર્લભમ્ ॥ ૧૦॥

ભ્રમન્ વનાન્તે નવમંજરીષુ ન ષટ્પદો ગન્ધફલીમજિઘ્રત્ ।
સા કિં ન રમ્યા સ ચ કિં ન રન્તા બલીયસી કેવલમીશ્વરેચ્છા ॥ ૧૧॥

ભો દારિદ્ય નમસ્તુભ્યં સિદ્ધોઽહં ત્વત્પ્રસાદતઃ ।
પશ્યામ્યહં જગત્સર્વં ન માં પશ્યતિ કશ્ચન ॥ ૧૨॥

ભાસસ્ય કાલિદાસસ્ય ભવભૂતેશ્ચ વિશ્રુતા ।
બાણશૂદ્રકહર્ષાણાં કાવ્યભાષાસ્તિ સંસ્કૃતમ્ ॥ ૧૩॥

ભીષ્મદ્રોણતટા જયદ્રથજલા ગાન્ધારનીલોત્પલા
શલ્યગ્રાહવતી કૃપેણ વહની કર્ણેન વેલાકુલા ।
અશ્વત્થામવિકર્ણઘોરમકરા દુર્યોધનાવર્તિની
સોત્તીર્ણા ખલુ પાણ્ડવૈર્રણનદી કૈવર્તકઃ કેશવઃ ॥ ૧૪॥

ભોજનાન્તે પિબેત્ તક્રં દિનાન્તે ચ પિબેત્ પયઃ ।
નિશાન્તે ચ પિબેત્ વારિ કિં વૈદ્યેન પ્રયોજનમ્ ॥ ૧૫॥

માતા મિત્રં પિતા ચેતિ સ્વભાવાત્ ત્રિતયં હિતમ્ ।
કાર્યકારણતશ્ચાન્યે ભવન્તિ હિતબુદ્ધયઃ ॥ ૧॥

મનો મધુકરો મેઘો મદ્યપો મત્કુણો મરુત્ ।
મા મદો મર્કટો મત્સ્યો મકારા દશ ચંચલાઃ ॥ ૨॥

માત્રા સમં નાસ્તિ શરીરપોષણં
ચિન્તાસમં નાસ્તિ શરીરશોષણં ।
મિત્રં વિના નાસ્તિ શરીર તોષણં
વિદ્યાં વિના નાસ્તિ શરીરભૂષણં ॥ ૩॥

મુખં પદ્મદલાકારં વાણી ચન્દનશીતલા ।
હૃદયં ક્રોધસંરક્તં ત્રિવિધં ધૂર્તલક્ષણમ્ ॥ ૪॥

મયૂરો વિહગો રમ્યઃ આનન્દયતિ માનવાન્ ।
પૃષ્ઠે સરસ્વતી તસ્ય ઉપવિષ્ટેતિ મન્યતે ॥ ૫॥

મૂર્ખસ્ય પંચ ચિહ્નાનિ ગર્વો દુર્વચનં તથા ।
ક્રોધશ્ચ દૃઢવાદશ્ચ પરવાક્યેષ્વનાદરઃ ॥ ૬॥

મૂકં કરોતિ વાચાલં પંગું લંઘયતે ગિરિમ્ ।
યત્કૃપા તમહં વન્દે પરમાનન્દમાધવમ્ ॥ ૭॥

મણિના વલયં વલયેન મણિઃ મણિના વલયેન વિભાતિ કરઃ ।
પયસા કમલં કમલેન પયઃ પયસા કમલેન વિભાતિ સરઃ ॥ ૮॥

મૃગમીનસજ્જનાનાં તૃણજલસન્તોષવિહિતવૃત્તીનામ્ ।
લુબ્ધકધીવરપિશુનઃ નિષ્કારણવૈરણો જગતિ ॥ ૯॥

મર્કટસ્ય સુરાપાનં તસ્ય વૃશ્ચિકદંશનમ્ ।
તન્મધ્યે ભૂતસંચારો યદ્વા તદ્વા ભવિષ્યતિ ॥ ૧૦॥

મૃગા મૃગૈઃ સંગમુપવ્રજન્તિ ગાવશ્ચ ગોભિસ્તુરગાસ્તુરંગૈઃ ।
મૂર્ખાશ્ચ મૂર્ખૈઃ સુધયઃ સુધીભિઃ સમાનશીલવ્યસનેષુ સખ્યમ્ ॥ ૧૧॥

મહાજનસ્ય સંસર્ગઃ કસ્ય નોન્નતિકારકઃ ।
પદ્મપત્રસ્થિતં તોયં ધત્તે મુક્તાફલશ્રિયમ્ ॥ ૧૨॥

મહાનુભાવસંસર્ગઃ કસ્ય નોન્નતિકારકઃ ।
રત્યામ્બુ જાહ્નવીસંગાત્ ત્રિદશૈરપિ વન્દ્યતે ॥ ૧૩॥

મા નિશાદ પ્રતિષ્ઠાં ત્વં અગમઃ શાશ્વતીઃ સમાઃ ।
યત્ક્રૌંચમિથુનાદેકમવધીઃ કામમોહિતમ્ ॥ ૧૪॥

મલિનૈરલકૈરેતૈઃ શુક્લત્વં પ્રકટીકૃતમ્ ।
તદ્દોષાદિવ નિર્યાતા વદનાદ્રદનાવલિઃ ॥ ૧૫॥

મૃદુરિત્યવજાનન્તિ તીક્ષ્ણ ઇત્યુદ્વિજન્તિ ચ ।
તીક્ષ્ણકાલે ભવેત્તીક્ષ્ણો મૃદુકાલે મૃદુર્ભવેત્ ॥ ૧૬॥

મારાત્પરઃ શૂરતરો ન કશ્ચિત્ પરાભવઃ સ્ત્રીહરણાન્ન ચાન્યઃ ।
તથાપિ નાબ્ધિં પ્રવિવેશ રામો બબન્ધ સેતું વિજયી સહિષ્ણુઃ ॥ ૧૭॥

મૌનાન્મૂર્ખઃ પ્રવચનપટુર્વાતુલો જલ્પકો વા
ક્ષાન્ત્યા ભીરુર્યદિ ન સહતે પ્રાયશો નાભિજાતઃ ।
ધૃષ્ટઃ પાર્શ્વે વસતિ નિયતં દૂરતશ્ચાપ્રગલ્ભઃ
સેવાધર્મઃ પરમગહનો યોગિનામપ્યગમ્યઃ ॥ ૧૮॥

યત્ર રામકથાગાનં તત્રાસ્તે હનુમાન્ યથા ।
સંસ્કૃતધ્યયનં યત્ર તત્ર સંસ્કૃતિદર્શનમ્ ॥ ૨૧॥

યદેવોપનતં દુઃખાત્ સુખં તદ્રસવત્તરમ્ ।
નિર્વાણાય તરુચ્છાયા તપ્તસ્ય હિ વિશેષતઃ ॥ ૨૨॥

યઃ સમુત્પતિતં ક્રોધં ક્ષમયૈવ નિરસ્યતિ ।
યથોરગસ્ત્વચં જીર્ણાં સ વૈ પુરુષ ઉચ્યતે ॥ ૨૩॥

યોગક્ષેમાય રાષ્ટ્રસ્ય સભ્યતાયાશ્ચ સંસ્કૃતેઃ ।
નૈવાન્યો વિદ્યતે પન્થા લોકસંઘટનં વિના ॥ ૨૪॥

યાં ચિન્તયામિ સતતં મયિ સા વિરક્તા
સાપ્યન્યમિચ્છતિ જનં સ જનોઽન્યસક્તઃ ।
અસ્મત્કૃતે ચ પરિતુષ્યતિ કાચિદન્યા
ધિક્ તાં ચ તં ચ મદનં ચ ઇમાં ચ માં ચ ॥ ૨૫॥

યયોરૈવ સમં વિત્તં યયોરૈવ સમં કુલમ્ ।
તયોર્મૈત્રિર્વિવાહશ્ચ ન તુ પુષ્ટવિપુષ્ટયોઃ ॥ ૨૬॥

યદ્ યદ્ વિભૂતિમત્સત્ત્વં શ્રીમદૂર્જિતમેવ વા ।
તત્તદેવાવગચ્છ ત્વં મમ તેજોઽંશસમ્ભવમ્ ॥ ૨૭॥

યઃ પૂતનામારણલબ્ધકીર્તિઃ કાકોદરો યેન વિનીતદર્પઃ ।
યશોદયાલંકૃતમૂર્તિરવ્યાત્ પતિર્યદૂનામથવા રઘૂણામ્ ॥ ૨૮॥

યદિ વા યાતિ ગોવિન્દો મથુરાતઃ પુનઃ સખી ।
રાધાયા નયનદ્વન્દ્વે રાધાનામવિપર્યયઃ ॥ ૨૯॥

યત્ર નાર્યસ્તુ પૂજ્યન્તે રમન્તે તત્ર દેવતાઃ ।
યત્ર તાસ્તુ ન પૂજ્યન્તે સર્વાસ્તત્રાફલાઃ ક્રિયાઃ ॥ ૩૦॥

યત્ર નાસ્તિ દધિમન્થનઘોષઃ તત્ર નો લઘુલઘુનિ શિશુનિ ।
યત્ર નાસ્તિ ગુરુગૌરવપૂજા તાનિ કિં બત ગૃહાણિ વનાનિ ॥ ૩૧॥

રૂપયૌવનસમ્પન્ના વિશાલકુલસમ્ભવાઃ ।
વિદ્યાહીના ન શોભન્તે નિર્ગન્ધાઃ કિંશુકા યથા ॥ ૧॥

રાષ્ટ્રધ્વજો રાષ્ટ્રભાષા રાષ્ટ્રગીતં તથૈવ ચ ।
એતાનિ માનચિહ્નાનિ સર્વદા હૃદિ ધાર્યતામ્ ॥ ૨॥

રત્નૈર્મહાર્હૈસ્તુતુષુર્ન દેવાઃ ન ભેજિરે ભીમવિષેણ ભીતિમ્ ।
સુધાં વિના ન પ્રયયુર્વિરામં ન નિશ્ચિદાર્થાદ્વિરમન્તિ ધીરાઃ ॥ ૩॥

રાત્રિર્ગમિષ્યતિ ભવિષ્યતિ સુપ્રભાતં
ભાસ્વાનુદેષ્યતિ હસિષ્યતિ પંકજશ્રીઃ ।
ઇત્થં વિચિન્તયતિ કોષગતે દ્વિરેફે
હા હન્ત હન્ત નલિનીં ગજ ઉજ્જહાર ॥ ૪॥

રે રે ચાતક સાવધાનમનસા મિત્ર ક્ષણં શ્રૂયતામ્
અમ્ભોદા બહવો વસન્તિ ગગને સર્વેપિ નૈકાદૃશાઃ ।
કેચિદ્વૃષ્ટીભિરાર્દયન્તિ ધરણીં ગર્જન્તિ કેચિદ્વૃથા
યં યં પશ્યસિ તસ્ય તસ્ય પુરતો મા બ્રૂહિ દીનં વચઃ ॥ ૫॥

રાત્રૌ જાનુ દિવા ભાનુ કૃશાનુઃ સન્ધ્યયોર્દ્વયોઃ ।
પશ્ય શીતં મયા નીતં જાનુભાનુકૃશાનુભિઃ ॥ ૬॥

રામાયણમ્ મહાકાવ્યમ્ મહાભારતમેવ ચ ।
ઉભે ચ વિશ્વવિખ્યાતે સંસ્કૃતસ્ય મહાનિધી ॥ ૭॥

રથસ્યૈકં ચક્રં ભુજગયમિતા સપ્તતુરગાઃ
નિરાલમ્બો માર્ગશ્ચરણવિકલઃ સારથિરપિ ।
રવિર્યાત્યન્તં પ્રતિદિનમપારસ્ય નભસઃ
ક્રિયાસિધિઃ સત્ત્વે ભવતિ મહતાં નોપકરણે ॥ ૮॥

રજકશ્ચર્મકારશ્ચ નટો વરુડ એવ ચ ।
કૈવર્તભેદભિલ્લાશ્ચ સપ્તૈતે ચાન્ત્યજાઃ સ્મૃતાઃ ॥ ૯॥

રે રે રાસભ વસ્ત્રભારવહનાત્કુગ્રાસમશ્નાસિ કિં
રાજાશ્વાવસથં પ્રયાહિ ચણકાભ્યૂષાન્ સુખં ભક્ષય ।
સર્વાન્ પૃચ્છવતો હયાનિતિ વદન્ત્યત્રાધિકારે સ્થિતા
રાજા તૈરુપ્દિષ્ટમેવ મનુતે સત્યં તટસ્થાઃ પરે ॥ ૧૦॥

રામાદ્યાચય મેદિનીં ધનપતેર્બીજં બલાલ્લાંગલમ્
પ્રેતેશાન્મહિષં તવાસ્તિ વૃષભઃ ફાલં ત્રિશૂલાદપિ ।
શક્તાહં તવ ચાન્નદાનકરણે સ્કન્દોઽપિ ગોરક્ષણે
ખિન્નાહં તવ યાચનાત્ કુરુ કૃષિં ભિક્ષાટનં મા કૃથાઃ ॥ ૧૧॥

રામાભિષેકે મદવિહ્વલાયાઃ હસ્તાચ્ચ્યુતો હેમઘટસ્તરુણ્યાઃ ।
સોપાનમાસાદ્ય કરોતિ શબ્દં ઠા ઠં ઠ ઠં ઠં ઠ ઠ ઠં ઠ ઠં ઠઃ ॥ ૧૨॥

લબ્ધ્વા તીક્ષ્ણં રવેસ્તેજઃ શાન્તં શીતકરો વહન્ ।
સર્વાન્ સન્તોષયન્ સોમઃ ઓષધીશો વિરાજતે ॥ ૧૩॥

લાલયેત્ પંચવર્ષાણિ દશવર્ષાણિ તાડયેત્ ।
પ્રાપ્તે તુ ષોડશે વર્ષે પુત્રે મિત્રવદાચરેત્ ॥ ૧૪॥

લોભમૂલાનિ પાપાનિ સંકટાનિ તથૈવ ચ ।
લોભાત્પ્રવર્તતે વૈરં અતિલોભાત્વિનશ્યતિ ॥ ૧૫॥

લક્ષ્મીઃ કૌસ્તુભપારિજાતકસુરાધન્વન્તરીચન્દ્રમાઃ
ગાવઃ કામદુહઃ સુરેશ્વરગજો રમ્ભાદિ દેવાંગનાઃ ।
અશ્વઃ સપ્તમુખઃ વિષં હરિધનુ શંખોઽમૃતં ચામ્બુધેઃ
રત્નાનીહ ચતુર્દશં પ્રતિદિનં કુર્વન્તુ વો મંગલમ્ ॥ ૧૬॥

લાલને બહવો દોષાસ્તાડને બહવો ગુણાઃ ।
અતશ્છાત્રશ્ચ પુત્રશ્ચ તાડયેન્ન તુ લાલયેત્ ॥ ૧૭॥

લોભાવિષ્ટો નરો વિત્તમ્ વીક્ષ્યતે ન તુ સંકટમ્ ।

દુગ્ધં પશ્યતિ માર્જારી ન તથા લગુડાહતિમ્ ॥ ૧૮॥

લાઘવં કર્મસામર્થ્યં સ્થૈર્યમ્ ક્લેશસહિષ્ણુતા ।
દોષક્ષયોઽગ્નિવૃદ્ધિશ્ચ વ્યાયામાદુપજાયતે ॥ ૧૯॥

લક્ષ્મીવન્તો ન જાનન્તિ પ્રાયેણ પરવેદનાઃ ।
શેષે ધરાભરાક્રાન્તે શેતે નારાયણઃ સુખમ્ ॥ ૨૦॥

વિદ્યાધિદેવતા સાક્ષાત્ ધન્યા દેવી સરસ્વતી ।
યત્પ્રસાદેન કુર્વન્તિ કાવ્યાનિ કવયઃ ખલુ ॥ ૧॥

વિષાદપ્યમૃતં ગ્રાહ્યં અમેધ્યાદપિ કાઙ્ચનમ્ ।
અમિત્રાદપિ સદ્વૃત્તં બાલાદપિ સુભાષિતમ્ ॥ ૨॥

વૃથા વૃષ્ટિઃ સમુદ્રેષુ વૃથા તૃપ્તસ્ય ભોજનમ્ ।
વૃથા દાનમ્ સમર્થસ્ય વૃથા દીપો દિવાપિ ચ ॥ ૩॥

વિદ્યા મિત્રં પ્રવાસેષુ ભાર્યા મિત્રં ગૃહેષુ ચ ।
વ્યાધિતસ્યૌષધં મિત્રમ્ ધર્મો મિત્રં મૃતસ્ય ચ ॥ ૪॥

વન્દે સરસ્વતીં દેવીં ઉત્તમાઙ્ગેન સર્વદા ।
મુખેન તાં પ્રશંસામિ હસ્તાભ્યાં પૂજયામિ ચ ॥ ૫॥

વૃક્ષાણામધિરાજો નુ નિત્યમામ્રો વિરાજતે ।
ગન્ધચ્છાયાપુષ્પફલૈઃ યો રઞ્જયતિ દુઃખિતાન્ ॥ ૬॥

વૃશ્ચિકસ્ય વિષં પૃચ્છે મક્ષિકાયા મુખે વિષમ્ ।
તક્ષકસ્ય વિષં દન્તે સર્વાઙ્ગે દુર્જનસ્ય તત્ ॥ ૭॥

વસન્ત્યરણ્યેષુ ચરન્તિ દુર્વાં પિબન્તિ તોયાનિ વને સ્થિતાનિ ।
તથાપિ નિઘ્નન્તિ મૃગાન્ નરા વૃથા કો લોકમારાધયિતું સમર્થઃ ॥ ૮॥

વિરલા જાનન્તિ ગુણાન્ વિરલાઃ કુર્વન્તિ નિર્ધને સ્નેહમ્ ।
વિરલાઃ પરકાર્યરતાઃ પરદુઃખેનાપિ દુઃખિતા વિરલાઃ ॥ ૯॥

વિદ્યા વિવાદાય ધનં મદાય ખલસ્ય શક્તિઃ પરપીડનાય ।
સાધોસ્તુ સર્વં વિપરીતમેતદ્ જ્ઞાનાય દાનાય ચ રક્ષણાય ॥ ૧૦॥

વરં દરિદ્રઃ શ્રુતિશાસ્ત્રપારગો ન ચાપિ મૂર્ખો બહુરત્નસંયુતઃ ।
સુલોચના જીર્ણપટાપિ શોભતે ન નેત્રહીના કનકૈરલઙ્કૃતા ॥ ૧૧॥

વરં ભૃત્યવિહીનસ્ય જીવનં શ્રમપૂરિતં ।
મૂર્ખભૃત્યસ્ય સંસર્ગાત્ સર્વં કાર્યં વિનશ્યતિ ॥ ૧૨॥

વરં બાલો વરં વૃદ્ધો ન તુ મૂર્ખોત્તમઃ ખલુ ।
મૂર્ખભૃત્યસ્ય સંસર્ગાત્ સર્વં કાર્યં વિનશ્યતિ ॥ ૧૩॥

વિકૃતિં નૈવ ગચ્છન્તિ સઙ્ગદોષેણ સાધવઃ ।
આવેષ્ટિતં મહાસર્પૈશ્ચન્દનં ન વિષાયતે ॥ ૧૪॥

વદનં પ્રસાદસદનં સદયં હૃદયં સુધામુચો વાચઃ ।
કરણં પરોપકરણં યેષં કેષાં ન તે વન્દ્યાઃ ॥ ૧૫॥

વક્રતુણ્ડ મહાકાય સૂર્યકોટિસમપ્રભ ।
નિર્વિઘ્નં કુરુ મે દેવ શુભકાર્યેષુ સર્વદા ॥ ૧૬॥

વસુદેવસુતં દેવં કંસચાણૂરમર્દનમ્ ।
દેવકીપરમાનન્દં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૭॥

વાલ્મીકિગિરિસમ્ભૂતા રામસાગરગામિની ।
પુનાતુ ભુવનં પુણ્યા રામાયણમહાનદી ॥ ૧૮॥

વરં વનં વરં ભૈક્ષ્યં વરં ભારોપજીવનં ।
પુંસાં વિવેકહીનાનાં સેવયા ન ધનાર્જનમ્ ॥ ૧૯॥

વજ્રાદપિ કઠોરાણિ મૃદૂનિ કુસુમાદપિ ।
લોકોત્તરાણાં ચેતાંસિ કો હિ વિજ્ઞાતુમર્હતિ ॥ ૨૦॥

વિપદિ ધૈર્યમથાભ્યુદયે ક્ષમા સદસિ વાક્પટુતા યુધિ વિક્રમઃ ।
યશસિ ચાભિરુચિર્વ્યસનં શ્રુતૌ પ્રકૃતિસિદ્ધમિયં હિ મહાત્મનામ્ ॥ ૨૧॥

વૈદ્યરાજ નમસ્તુભ્યં યમરાજસહોદર ।
યમસ્તુ હરતિ પ્રાણાન્ વૈદ્યો પ્રાણાન્ ધનાનિ ચ ॥ ૨૨॥

વિતર વારિદ વારિ દવાતુરે ચિરપિપાસિતચાતકપોતકે ।
પ્રચલિતે મરુતિ ક્ષણમન્યથા ક્વ ચ ભવાન્ ક્વ પયઃ ક્વ ચ ચાતકઃ ॥ ૨૩॥

વનાનિ દહતો વહ્નેઃ સખા ભવતિ મારુતઃ ।
સ એવ દીપનાશાય કૃશે કસ્યાસ્તિ સૌહૃદમ્ ॥ ૨૪॥

વરમેકો ગુણી પુત્રો ન તુ મૂર્ખશતાન્યપિ ।
એકશ્ચન્દ્રસ્તમો હન્તિ ન તુ તારાગણોઽપિ ચ ॥ ૨૫॥

વરં પર્વતદુર્ગેષુ ભ્રાન્તં વનચરૈઃ સહ ।
ન મૂર્ખજનસંસર્ગઃ સુરેન્દ્રભુવનેષ્વપિ ॥ ૨૬॥

વ્યાયામાત્ લભતે સ્વાસ્થ્યં દીર્ઘાયુષ્યં બલં સુખમ્ ।
આરોગ્યં પરમં ભાગ્યં સ્વાસ્થ્યં સર્વાર્થસાધનમ્ ॥ ૨૭॥

વસન્તિ કાનને વૃક્ષાઃ ફલપુષ્પૈશ્ચ ભૂષિતાઃ ।
આમ્રં વિના પરં ચિત્તં કોકિલસ્ય ન તુષ્યતિ ॥ ૨૮॥

વરં બુદ્ધિર્ન સા વિદ્યા વિદ્યયા બુદ્ધિરુત્તમા ।
બુદ્ધિહીના વિનશ્યન્તિ યથા તે સિંહકારકાઃ ॥ ૨૯॥

વિલક્ષણઃ શબ્દકોષઃ વિદ્યતે તવ ભારતિ ।
વ્યયેન વર્ધતે નિત્યં ક્ષયં ગચ્છતિ સઞ્ચયાત્ ॥ ૩૦॥

વેદાન્તાનાં પુરાણાનાં શાસ્ત્રાનાં ચ તથૈવ ચ ।
મન્ત્રાણાં તન્ત્રસૂત્રાણામાદ્યભાષાસ્તિ સંસ્કૃતમ્ ॥ ૩૧॥

વાસાંસિ જીર્ણાનિ યથા વિહાય નવાનિ ગૃહ્ણાતિ નરોઽપરાણિ ।
તથા શરીરાણિ વિહાય જીર્ણાન્યન્યાનિ સંયાતિ નવાનિ દેહી ॥ ૩૨॥

વાતોલ્લાસિતકલ્લોલ ધિક્ તે સાગરગર્જનમ્ ।
યસ્ય તીરે તૃષાક્રાન્તઃ પાન્થઃ પૃચ્છતિ વાપિકમ્ ॥ ૩૩॥

વ્યાસાય વિષ્ણુરૂપાય વ્યાસરૂપાય વિષ્ણવે ।
જ્ઞાનમુદ્રાય કૃષ્ણાય ગીતામૃતદુહે નમઃ ॥ ૩૪॥

વૃક્ષાગ્રવાસી ન ચ પક્ષિરાજઃ
ત્રિનેત્રધારી ન ચ શૂલપાણિઃ ।
ત્વગ્વસ્ત્રધારી ન ચ સિદ્ધયોગી
જલં ચ બિભ્રન્ન ઘટો ન મેઘઃ ॥ ૩૫॥

વાગર્થાવિવ સમ્પૃક્તૌ વાગર્થપ્રતિપત્તયે ।
જગતઃ પિતરૌ વન્દે પાર્વતીપરમેશ્વરૌ ॥ ૩૬॥

વ્રજત્યધોઽધો યાત્યુચ્ચૈર્નરઃ સ્વૈરેવ કર્મભિઃ ।
ખનિતેવ હિ કૂપસ્ય પ્રાસાદસ્યેવ કારકઃ ॥ ૩૭॥

વિશ્વાભિરામગુણગૌરવગુમ્ફિતાનાં

રોષોઽપિ નિર્મલધિયાં રમણીય એવ ।
લોકપ્રિયૈઃ પરિમલૈઃ પરિપૂરિતસ્ય
કાશ્મીરજસ્ય કટુતાપિ નિતાન્તરમ્યા ॥ ૩૮॥

વિરાટનગરે રાજન્ કીચકાદુપકીચકમ્ ।
અત્ર ક્રિયાપદં ગુપ્તં મર્યાદા દશવાર્શિકિ ॥ ૩૯॥

વહ્નિસ્તસ્ય જલાયતે જલનિધિઃ કુલ્યાયતે તત્ક્ષણાત્
મેરુઃ સ્વલ્પશિલાયતે મૃગપતિઃ સદ્યઃ કુરઙ્ગાયતે ।
વ્યાલો માલ્યગુણાયતે વિષારસઃ પીયૂશવર્ષાયતે
યસ્યાઙ્ગેઽખિલલોકવલ્લભતમં શીલં સમુન્મીલતિ ॥ ૪૦॥

સદાચારેણ સર્વેષાં શુદ્ધં ભવતિ માનસમ્ ।
નિર્મલં ચ વિશુદ્ધં ચ માનસં દેવમન્દિરમ્ ॥ ૧॥

સુભાષિતરસાસ્વાદઃ સજ્જનૈઃ સહ સઙ્ગતિઃ ।
સેવા વિવેકિભૂપસ્ય દુઃખનિર્મૂલનં ત્રયમ્ ॥ ૨॥

સદયં હૃદયં યસ્ય ભાષિતં સત્યભૂષિતમ્ ।
દેહઃ પરહિતે યસ્ય કલિસ્તસ્ય કરોતિ કિમ્ ॥ ૩॥

સુખસ્યાનન્તરં દુઃખમ્ દુઃખસ્યાનન્તરં સુખમ્ ।
ન નિત્યં લભતે દુઃખં ન નિત્યં લભતે સુખમ્ ॥ ૪॥

સ્થાનભ્રષ્ટા ન શોભન્તે દન્તાઃ કેશા નખા નરાઃ ।
ઇતિ વિજ્ઞાય મતિમાન્ સ્વસ્થાનં ન પરિત્યજેત્ ॥ ૫॥

સુકુલજન્મ વિભૂતિરનેકધા પ્રિયસમાગમસૌખ્યપરમ્પરાઃ ।
બુધજને ગુરુતા વિમલં યશઃ ભવતિ પુણ્યતરોઃ ફલમીદૃશમ્ ॥ ૬॥

સુન્દરોઽપિ સુશીલોઽપિ કુલીનોઽપિ મહાધનઃ ।
ન શોભતે વિના વિદ્યાં વિદ્યા સર્વસ્ય ભૂષણમ્ ॥ ૭॥

સર્વે યત્ર વિનેતારઃ સર્વે પણ્ડિતમાનિનઃ ।
સર્વે મહત્ત્વમિચ્છન્તિ રાષ્ટ્રં તદવસીદતિ ॥ ૮॥

સ્વભાવો નોપદેશેન શક્યતે કર્તુમન્યથા ।
સુતપ્તમપિ પાનીયં પુનર્ગચ્છતિ શીતતામ્ ॥ ૯॥

સમુદ્રવસને દેવિ પર્વતાવલિભૂષિતે ।

વિષ્ણુપત્નિ નમસ્તુભ્યં પાદસ્પર્શં ક્ષમસ્વ મે ॥ ૧૦॥

સર્વથા સન્ત્યજેદ્વાદં ન કઞ્ચિન્મર્મણિ સ્પૃશેત્ ।
સર્વાન્ પરિત્યજેદર્થાન્ સ્વાધ્યાયસ્ય વિરોધિનઃ ॥ ૧૧॥

સૂર્યં ભર્તારમુત્સૃજ્ય પર્વતં મારુતં ગિરિમ્ ।
સ્વજાતિં મૂષિકા પ્રાપ્તા સ્વભાવો દુરતિક્રમઃ ॥ ૧૨॥

સ જાતો યેન જાતેન યાતિ વંશઃ સમુન્નતિમ્ ।
પરિવર્તિનિ સંસારે મૃતઃ કો વા ન જાયતે ॥ ૧૩॥

સમ્પૂર્ણકુમ્ભો ન કરોતિ શબ્દમ્ અર્ધો ઘટો ઘોષમુપૈતિ નૂનમ્ ।
વિદ્વાન્ કુલીનો ન કરોતિ ગર્વં મુઢાસ્તુ જલ્પન્તિ ગુણૈર્વીહીનાઃ ॥ ૧૪॥

સૌવર્ણાનિ સરોજાનિ નિર્માતું સન્તિ શિલ્પિનઃ ।
તત્ર સૌરભનિર્માણે ચતુરશ્ચતુરાનનઃ ॥ ૧૫॥

સમ્પદો મહતામેવ મહતામેવ ચાપદઃ ।
વર્ધતે ક્ષીયતે ચન્દ્રો ન તુ તારાગણઃ ક્વચિત્ ॥ ૧૬॥

સત્યાનુસારિણી લક્ષ્મીઃ કીર્તિસ્ત્યાગાનુસારિણી ।
અભ્યાસસારિણી વિદ્યા બુદ્ધિઃ કર્માનુસારિણી ॥ ૧૭॥

સેવિતવ્યો મહાવૃક્ષઃ ફલચ્છાયાસમાન્વિતઃ ।
યદિ દૈવાત્ ફલં નાસ્તિ છાયા કેન નિવાર્યતે ॥ ૧૮॥

સર્વત્ર દેશે ગુણવાન્ શોભતે પ્રેરિતો નરઃ ।
મણિઃ શીર્ષે ગલે બાહૌ યત્ર કુત્રાપિ શોભતે ॥ ૧૯॥

સ્વયં પઞ્ચમુખઃ પુત્રૌ ગજાનનષડાનનૌ ।
દિગમ્બરઃ કથં જીવેત્ અન્નપૂર્ણા ન ચેદ્ગૃહે ॥ ૨૦॥

સ્વયં મહેષઃ શ્વશુરઃ નગેશઃ સખઃ ધનેશઃ તનયો ગણેશઃ ।
તથાપિ ભીક્ષાટનમેવ શમ્ભોઃ બલીયસી કેવલમીશ્વરેચ્છા ॥ ૨૧॥

સન્તપ્તાયસિ સંસ્થિતસ્ય પયસો નામાપિ ન જ્ઞાયતે
મુક્તાકારતયા તદેવ નલિનીપત્રસ્થિતં રાજતે ।
સ્વાત્યાં સાગરશુક્તિમધ્યપતિતં સન્મૌક્તિકં જ્ઞાયતે
પ્રાયેણોત્તમમધ્યમાધમદશા સંસર્ગતો જાયતે ॥ ૨૨॥

સજ્જનસ્ય હૃદયં નવનીતં યદ્વદન્તિ કવયસ્તદલીકં ।

અન્યદેહવિલસત્પરિતાપાત્ સજ્જનો દ્રવતિ નો નવનીતમ્ ॥ ૨૩ ॥

સુખં હિ દુઃખાન્યનુભૂય શોભતે
ઘનાન્ધકારેષ્વિવ દીપદર્શનમ્ ।
સુખાત્તુ યો યાતિ નરો દરિદ્રતાં
ધૃતઃ શરીરેણ મૃતઃ સ જીવતિ ॥ ૨૪ ॥

સારઙ્ગાઃ સુહૃદો ગૃહં ગિરિગુહા શાન્તિઃ પ્રિયા ગેહિની
વૃત્તિર્વન્યફલૈર્નિવસનં શ્રેષ્ઠં તરૂણાં ત્વચઃ ।
તદ્ધ્યાનામૃતપૂરમગ્નમનસાં યેષામિયં નિવૃતિઃ
તેષામિન્દુકલાવતંસયમિનાં મોક્ષેઽપિ નો ન સ્પૃહા ॥ ૨૫ ॥

સ્વસ્તિ શ્રીભોજરાજન્ ત્વમખિલભુવને ધાર્મિકઃ સત્યવક્તા
પિત્રા તે સઙ્ગૃહીતા નવનવતિમિતા રત્નકોટ્યો મદીયાઃ ।
તાસ્ત્વં દેહીતિ રાજન્ સકલબુધજનૈર્જ્ઞાયતે સત્યમેતદ્
નો વા જાનન્તિ યત્તન્મમ કૃતિમપિ નો દેહિ લક્ષં તતો મે ॥ ૨૬ ॥

સુલભાઃ પુરુષા લોકે સતતં પ્રિયવાદિનઃ ।
અપ્રિયસ્ય ચ શબ્દસ્ય વક્તા શ્રોતા ચ દુર્લભઃ ॥ ૨૭ ॥

સપ્તૈતાનિ ન પૂર્યન્તે પૂર્યમાણાન્યનેકશઃ ।
સ્વામી પયોધિરુદરં કૃપણોઽગ્નિર્યમો ગૃહમ્ ॥ ૨૮ ॥

સૂતો વા સૂતપુત્રો વા યો વા કો વા ભવામ્યહમ્ ।
દૈવાયત્તં કુલે જન્મ મદાયત્તં તુ પૌરુષમ્ ॥ ૨૯ ॥

સુભાષિતેન ગીતેન યુવતીનાં ચ લીલયા ।
યસ્ય ન દ્રવતે ચિત્તં સ વૈ મુક્તોઽથવા પશુઃ ॥ ૩૦ ॥

સિંહઃ શિશુરપિ નિપતતિ મદમલિનકપોલભિત્તિષુ ગજેષુ ।
પ્રકૃતિરિયં સત્ત્વવતાં તેજસાં હિ ન વયઃ સમીક્ષ્યતે ॥ ૩૧ ॥

સાહિત્ય સઙ્ગીતકલાવિહીનઃ સાક્ષાત્ પશુઃ પુચ્છવિષાણહીનઃ ।
તૃણં ન ખાદન્નપિ જીવમાનસ્તદ્ભાગધેયં પરમં પશૂણામ્ ॥ ૩૨ ॥

સરસ્વતીં નમસ્યામિ ચેતનાનાં હૃદિ સ્થિતામ્ ।
મતિદાં વરદાં શુદ્ધાં વીણાહસ્તવરપ્રદામ્ ॥ ૩૩ ॥

સર્પા પિબન્તિ પવનં ન ચ દુર્બલાસ્તે

શુષ્કૈસ્તૃણૈર્વનગજા બલિનો ભવન્તિ ।
કન્દૈઃ ફલૈર્મુનિવરાઃ ક્ષપયન્તિ કાલાં
સન્તોષ એવ પુરુષસ્ય પરં નિધાનમ્ ॥ ૩૪॥

સંસ્કૃતં દેવભાષાસ્તિ વેદભાષાસ્તિ સંસ્કૃતમ્ ।
પ્રાચીનજ્ઞાનભાષા ચ સંસ્કૃતં ભદ્રમણ્ડનમ્ ॥ ૩૫॥

સુહૃન્મિત્રાર્યુદાસીનમધ્યસ્થદ્વેષ્યબન્ધુષુ ।
સાધુષ્વપિ ચ પાપેષુ પણ્ડિતાઃ સમદર્શનાઃ ॥ ૩૬॥

સ્વાયત્તમેકાન્તહિતં વિધાત્રા વિનિર્મિતં છાદનમજ્ઞતાયાઃ ।
વિશેષતઃ સર્વવિદાં સમાજે વિભૂષણં મૌનમપણ્ડિતાનામ્ ॥ ૩૭॥

સાક્ષરાઃ વિપરીતાશ્ચેદ્રાક્ષસા એવ કેવલમ્ ।
સરસો વિપરીતશ્ચેત્સરસત્ત્વં ન મુઞ્ચતિ ॥ ૩૮॥

સ્વાતન્ત્ર્યો હિ મનુષ્યાણામધિકારો સ્વભાવજઃ ।
તમહં પ્રાર્થયે નિત્યં લોકમાન્યવચસ્ત્વિદમ્ ॥ ૩૯॥

સત્યં બ્રૂયાત્ પ્રિયં બ્રૂયત્ ન બ્રૂયાત્ સત્યમપ્રિયં ।
પ્રિયં ચ નાનૃતં બ્રૂયાત્ એષ ધર્મઃ સનાતનઃ ॥ ૪૦॥

સ્નેહં દયાં ચ સૌખ્યં ચ યદિ વા જાનકીમપિ ।
આરાધનાય લોકસ્ય મુઞ્ચતો નાસ્તિ મે વ્યથા ॥ ૪૧॥

સ્નેહં દયાં ચ સૌખ્યં ચ યદિ વા જીવનમપિ ।
ઉદ્ધારણાય નારીણાં મુઞ્ચતો નાસ્તિ મે વ્યથા ॥ ૪૨॥

સન્તોષામૃતતૃપ્તાનાં યત્સુખં શાન્તચેતસામ્ ।
કુતસ્તદ્ધનલુબ્ધાનાં એતશ્ચેતશ્ચ ધાવતામ્ ॥ ૪૩॥

સર્પદુર્જનયોર્મધ્યે વરં સર્પો ન દુર્જનઃ ।
સર્પો દશતિ કાલેન દુર્જનસ્તુ પદે પદે ॥ ૪૪॥

સંહિતૈકપદે નિત્યા નિત્યા ધાતૂપસર્ગયોઃ ।
નિત્યા સમાસે વાક્યે તુ સા વિવક્ષામપેક્ષતે ॥ ૪૫॥

સચ્છિદ્રનિકટે વાસો ન કર્તવ્યઃ કદાચન ।
ઘટી પિબતિ પાનીયં તાડ્યતે ઝલ્લરી યથા ॥ ૪૬॥

સહસા વિદધીત ન ક્રિયાં અવિવેકઃ પરમાપદાં પદમ્ ।

વૃણુતે હિ વિમૃશ્યકારિણં ગુણલુબ્ધા સ્વયમેવ સમ્પદા ॥ ૪૭॥

સરસ્વતિ નમસ્તુભ્યં વરદે કામરૂપિણી ।
વિશ્વરૂપે વિશાલાક્ષી વિદ્યાં દેહિ શુભઙ્કરિ ॥ ૪૮॥

સર્પરાજ નમામિ ત્વાં ક્રૂરમપ્યુપકારકમ્ ।
ક્ષેત્રં રક્ષસિ ચાસ્માકં શુદ્ધસ્ત્વં સુન્દરસ્તથા ॥ ૪૯॥

Transliterated by Kedar Naphade

*Kedar's SubhaShita Collection*
pdf was typeset on July 11, 2024

Please send corrections to *sanskrit@cheerful.com*